CC-0. Nepal Sanskrit Academy, Kathmandu

८०

नेपालराष्ट्रियपुस्तकालयस्थहस्तलिखितपुस्तकानाम्

सूचीपत्रम्

द्वितीयो भागः

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

श्री ५ महाराजाधिराजानां
४५ तमशुभजन्मोत्सवावसरे प्रकाशितम्

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu SCANNED

नेपालराष्ट्रियपुस्तकालयस्थहस्तलिखितपुस्तकानाम्

सूचीपत्रम्

यस्यायं

ज्योतिषविषयः

द्वितीयो भागः

तस्यायं प्रथमखण्डः

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

पुरातत्त्वग्रन्थमाला २७
प्रथमसंस्करणम् १०००

श्रीनारायणप्रसाद शर्म्मणः अध्यक्षतायाम्
ज्योतिषाचार्य महेन्द्रविद्याभूषण पण्डित देवीप्रसाद लंसालेन
संपादितम्

नेपालराष्ट्रियपुस्तकालयतः प्रकाशितम्

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

प्राक्कथन

ज्योतिष शास्त्रको इतिहास निकै पुरानो छ र यस शास्त्रलाई आद्य-शास्त्र पनि भनिन्छ। आजको वैज्ञानिक युगको मानव एकतर्फ चन्द्रमामा अर्को विश्ववसाउने चेष्टामा प्रतत्तशील छ त अर्का पट्टि पुरानो ज्योतिष शास्त्रमा पनि मानिसहरूको प्रबल विश्वास देखिन्छ। केही ढोंगी र अपठित व्यक्तिहरूले ज्योतिषी बन्ने ढोंग रचेर मानिसहरूको विश्वासमा धक्का पुऱ्यायेता पनि ज्योतिष विषयमा उच्च शिक्षित विद्वानले राम्रो संग गणना गरी निकालेमा ज्योतिषको नियम खरो उत्रन्छ र यस प्रति मानिसहरूको विश्वास अझ पनि शिथिल भएको छैन। ज्योतिषीहरू द्वारा विश्लेषण गरिएको आफ्नो भाग्यचक्रमा उनीहरू विश्वास गर्दछन्। अतः पुस्तकालयमा रहेका ज्योतिष ग्रन्थहरूको उचित संरक्षण र यिनबाट हुने लाभ उठाउन सर्वसाधारणलाई अमुक पुस्तकालयमा के के छ भनेर जान्न नितान्त आवश्यक हुन्छ र यसको पूर्ति सूचि पत्रलेनै गर्छ।

हस्तलिखित ग्रन्थहरूको महत्व र सूचिकरणको आवश्यकता बारे यसै साथ प्रकाशन हुन लागेको बौद्धशास्त्र, बौद्ध दर्शनको सूचिपत्रको दुई शब्द शीर्षक अन्तर्गत उल्लेख गरिसकियेको छ। पुस्तकालयमा रहेका विभिन्न विषयका ग्रन्थहरूको वर्गीकृत सूचि बनाउँदै लैजाने क्रममा यो हस्तलिखित ग्रन्थहरूको दोश्रो सूचि हो। ज्योतिष विषयक ग्रन्थहरूको लगभग ३५—४० फर्मा जति हुने सम्भावना छ र यस प्रथम भागमा १३ फर्मा जति प्रकाशित गरिएको छ। यस प्रकारको सूचिकरणबाट पुस्तकालयमा बसेर अध्ययन गर्ने पाठक वर्ग, अनुसन्धान कर्ताहरू तथा घरैमा बसेर अमुक पुस्तक पुस्तकालयमा छ छैन भनेर जान्न चाहने इच्छुक महानुभावहरूलाई सहायक सिद्ध हुनेछ भन्ने आशा र विश्वास पुस्तकालयले राखेको छ।

श्री ५ महाराधिराज सरकारको ४५ सौं शुभ जन्मोत्सवको उपलक्षमा यस पुस्तकालयबाट प्रकाशनमा ल्याइयेका कृतिहरू मध्ये यो तेस्रो कृति हो (अन्य दुइ पुस्तकहरू जगन्मोहनम् र बौद्ध दर्शनको सूचिपत्र) मौसूफको शुभ जन्मजयन्तीमा यी ससाना कृतिहरू प्रकाशनमा ल्याउन पाउँदा पुस्तकालयले विशेषहर्ष अनुभव गरेको छ र मौसूफ सरकारको चिरायु र सुस्वास्थ्य को सतत् कामना गर्दछ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अन्त्यमा पुस्तकालयका अनुपम सहयोगी उपाध्यक्ष शङ्करनाथ अधिकारी एवं कर्मचारीहरू तथा यो सूचि तयार पार्नेमा परिश्रम गर्ने पं० देवीप्रसाद लेसाल र पं० यज्ञानन्द गुभाज्यूलाई विशेष धन्यवाद दिन्छु। यस सूचिमा कतिपय कारणवश हुन गएका सम्भाव्य त्रुटिहरूको सूचना विज्ञ तथा सहृदय पाठक वर्गबाट प्राप्त भएमा पुस्तकालयले सदैव स्वागत गर्ने छ र भविष्यमा प्रकाशित गरिने सूचिहरूमा यथा शक्य सुधार गरिने छ।

नारायण प्रसाद शर्मा
अध्यक्ष
नेपालराष्ट्रियपुस्तकालय।

काठमाडौं
मिति ०२६।५।२६।५

CC-0. Nepal Sanskrit Academy, Kathmandu

अङ्कचिन्तामणिः

क्रमाङ्कः ४०११ | विषयाङ्कः १

ग्रन्थकारः ········ देवनागरी लिपिः । नेपालीयं कागतम् । पङ्क्तयः ६।७ । आकारः १०×४ । पत्रसंख्या ४ । ग्रन्थसंख्या ७५ । पूर्णः ।

आदिवाक्यम्—

श्रीगणेशायनमः ।

वाञ्छा तदर्धं कृतरूप हीनं त[1]नै ग्रहैः षोडश सप्तचाष्टम् । तिथेर्दशांशे प्रथमे च काष्ठे नानाभि यन्त्रैः कथितो मुनीन्द्रैः । वन्हि ३ श्चवसु ८ मेक १ स्तथैव च । वेदपञ्च ५ तथाङ्केया इत्ते ते स्थिर अङ्का ॥

अन्तिमंवाक्यम्—

ॐ नमः सिद्धिः । गुरु आज्ञा ॐ हकी स्वाहा । कुटकु स्वाहा । जप संख्या १०८ । द्वि २ रस ६ वाण ५ वन्हिश्च ३ सप्त ७ मेकं १ तथैव च । वेद ४ यु । प्रमाणेन इत्येते स्थिर अङ्का । इति अंक चिन्तामणिः समाप्तः । संवत् १८८२ साल मिति ज्येष्ठवदी रोज ३ लिखितमिदं पुस्तकम्

अङ्गस्पर्शप्रश्नः

क्रमाङ्कः ४०१२ | विषयाङ्कः २

ग्रन्थकारः काशीनाथः । देवनागरी लिपिः । नेपालीयं कागतम् । पङ्क्तयः १० । आकारः ६१/४×४ । पूर्णः । पत्रसंख्या ३ ग्रन्थसंख्या १२५ ।

---

१. चिन्त्यमिदम्

CC-0. Nepal Sanskrit Academy, Kathmandu

श्रीमङ्गलमूर्तये नमः

आदिवाक्यम् —

शिरोमुखं करं नेत्रं पृष्ट्वा पृच्छति चेज्जनः ।
सुवर्णधनधान्यानां लाभस्तस्य न संशयः ॥१॥
स्कन्धग्रीवाकण्ठहस्तपृष्ठे लाभो हि दुःखदः ॥
कुक्षिनाभिसमालंभे भक्षपानादि सिद्ध्यति ॥२॥
जङ्घालिङ्गकटिस्पर्शे कन्यालाभसुतोद्भवौ
जानुगुल्मपदा स्पर्शे महाक्लेशः प्रजायते ॥३॥

पुष्पिकावाक्यानि—

इति काशीनाथकृते अङ्गस्पर्शः प्रथमः ।
,, ,, घटिकासाधनम् ।
,, ,, गृहाधिपाः ।
,, ,, ग्रहउच्चनीचराशिः ।
,, ,, मित्रशत्रुग्रहाः ।
,, ,, ग्रहवैरम् ।
,, ,, राहुगृहमुच्चनीचम् ।
,, ,, केतुगृहमुच्चनीचम् ।
,, ,, द्वादशवेश्म वीक्षणम् ।

अक्षत नीरक्षणम्

क्रमाङ्कः ३०९३ विषयाङ्कः ३

ग्रन्थकारः … … । देवनागरी लिपिः । नेपालीयं कागतम् ।
पङ्क्तयः ७ । आकारः ८×४ । पत्रसंख्या ३ । ग्रन्थसंख्या ३४ । पूर्णम् ।

आदिवाक्यम्—

श्रीगणेशाय नमः ॥ वराहतन्त्रे -
पितृजनकृतदोषे दाहतृष्णाक्षुधाः स्यात्

CC-0. Nepal Sanskrit Academy, Kathmandu

ज्वर वमन शिरोऽर्ति मेष लग्नेऽगपीडा ।
द्विजकृतभुजिभोज्यं तर्पणं पिण्डदानं
जलघटदिनमेकं पिप्पलं पूजनीयम् ॥
वृषे गोत्रदोषं ज्वरं तापतृष्णा बलं निर्बलं कर्णनेत्राऽङ्गपीडा ।
कृते शक्तिपाठे च नैवेद्यदानं कृतं क्षीर होमादिकं रोगनाशः ।

अन्तिमं वाक्यम्—

स्वक्षेत्रे गोत्रजो दोषः परक्षेत्रे परोद्भवः ।
शत्रुक्षेत्रे शत्रुदोषो मित्र स्वजनवान्धवः ॥
इति अक्षत नीरक्षणं समाप्तम् ॥

अद्भुतदर्पणम्

क्रमाङ्कः ५१०४ विषयाङ्क : ४

ग्रन्थकारः- माधवः । नेपालीयं कागतम् । नेवारी लिपिः । पंक्तयः ८ ।
आकारः १२×४ । पत्रसंख्या १८२ । ग्रन्थसंख्या ३६२५ । पूर्णप्रायम् ।

आदिवाक्यम् –

श्रीगणेशाय नमः ।

संज्ञाने हरिणाऽऽहिते कुतुकिना नीवीं करेण श्लथां
धृत्वा भुग्नितवामबाहुलतया चावेष्ट्य वक्षस्थलीम् ।
किञ्चित्कुञ्जितमध्यमंजुलतरं पश्चाद्व्रजन्त्याः शनै-
र्दोर्दोलायितचक्षुषोऽवुधिभुवः काकूक्तयः पान्तु वः ॥

कन्यादातरि संप्रयोक्तरि तयो रन्योन्यवीक्षाविधौ
नम्रे देवपुरोधसा मुखविधौ देव्याः समुद्ग्रीविते ।
अंतः स्कन्दलि(त)स्पृहं दिविषदामत्यर्णमिल्याकुलं
प्रेम्णां यल्लुचिता पुनातु शिव[1]याः व्रीडावलीढादृशः

दैत्येयेष्टसिवल्लयः स्मररिपोः श्रृङ्गारपुष्पस्रजो
भक्तानां सुरधेनवादिविषदा मुक्तं सरत्नत्विषा ।

---

१ शिवाया इति भाव्यम्

CC-0. Nepal Sanskrit Academy, Kathmandu

यज्ञप्राच्याधिपां फलप्रतिभुवोऽ नंगस्य जीवातवो
विघ्ना घ्नत्वघमर्षणारिवद्द्वाज्ञेयाः कटाक्षामयाः ॥

सुनूना रघुनाथस्य बुधबालकुलोद्गतः।
श्रीकृष्णाराधनव्यग्र मतिनाथानुजन्मना ॥
महामहोपदाढ्यस्य गोविन्दस्याग्रजन्मना।
क्रियते माधवेनायं श्रीमदद्भुतदर्पणः ॥
अप्रामाण्यस्य शंकापि नेहकार्या सुधीजनैः।
यथा सागरमालोक्य वहुग्रन्थान् विलिख्यते ॥
दिव्यानां लेखनं पूर्वमिह सम्यक् वितन्यते ।
नाभसानां ततः पश्चाद्भौमानां तु ततः परम् ॥

अन्तिमंवाक्यम्–

शिलिपरसेन्द्रियनल शशि विषयगुणर्तु पञ्चवसु पक्ष विष भूत अर्णवा-
द्रिरुद्रा विश्ववसु दहन शत पक्ष वसवो द्वात्रिंशभेति तारकामानम्।
यथो संवत्सरेण पाकसमयो बोद्धव्या।
इति पाकसमयाद्भुतानि। इति भौमाद्भुतम्।
इतिश्रीमाधवविरचितोऽ द्भुतदर्पणः ॥

पुष्पिकावाक्यानि--

इति मयूरचित्रकं (त्रि) समाप्तम्।
इति सूर्याद्भुतम्।
इति संक्रांत्यद्भुतम्।
इति चन्द्राद्भुतम्।
इति कुजाद्भुतम्।
इति बुधाद्भुतम्।
इति बृहस्पत्यद्भुतम्।
इति शुक्राद्भुतम्।
इति शनैश्चराद्भुतम्।
इति राह्वद्भुतम्।
इति केत्वद्भुतम्।

CC-0. Nepal Sanskrit Academy, Kathmandu

इति अगस्त्य सप्तर्षिध्रुवाणामद्भुतम् ।

इति ग्रहयुद्धम् ।

इति अद्भुतदर्पणे दिव्याद्भुतविम्बः समाप्तिमगमत् ।

इति प्रति सूर्याद्भुतम् ।

इति परिवेषाद्भुतम ।

इति दण्डाद्भुतम् ।

इति गन्धर्वनगराद्भुतम् ।

इति निर्घाताद्भुतम् ।

इति इन्द्रधनुरद्भुतम् ।

इति सन्ध्याद्भुतम् ।

इति सन्ध्याकालिक रविकिरणाद्भुतम् ।

इति दिग्दाहाद्भुतम् ।

इति छायाद्भुतम् ।

इति रजोनिहाराद्भुतम् ।

इत्युल्काद्भुतम् ।

इति विद्युदद्भुतम् ।

इति मेघाद्भुतम् ।

इति मेघाद्भुतम् ।

इति भूकम्पाद्भुतम् ।

इति वृष्ट्यद्भुतम् ।

इति कबन्धाद्भुतम् ।

इति अद्भुतदर्पणे नाभसाद्भुत पटलः समाप्तः ।

इति भूकम्पाद्भुतम् ।

इति जलाशयाद्भुतम् ।

इत्यन्याद्भुतम् ।

इतिप्रतिमाद्भुतम् ।

इति शक्रध्वजाद्भुतम् ।

इति गृहाद्भुतम् ।

इति वातजोपस्कराद्भुतम् ।

इति वृक्षवल्लीशस्याद्भुतानि ।

इति दिव्य स्त्रीपुरुषदर्शनाद्भुतम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

इति शस्त्राद्भुतानि ।
इति मानुषाद्भुतानि ।
इति प्रसवाद्भुतानि ।
इति दन्ताद्भुतानि ।
इति एकीय परिशिष्टाद्भुतानि ।
इति शाकुनाद्भुतम् ।
इति नानाविहङ्गाद्भुतम् ।
इति गजाद्भुतम् ।
इनिअश्वाद्भुतम् ।
इति खञ्जरिटाद्भुतम् ।
इति पिपिलिकाद्भुतम् ।
इति गृहगोधिकाद्भुतम् ।
इनि वृषभाद्भुतम् ।
इति बिडालाद्भुतम् ।
इति शृगालाद्भुतम् ।
इति लोमडिकाद्भुतम् ।
इति कृष्णपेचिकाद्भुतम् ।
इति सामान्या शुभसूचक शाकुनकथनम् ।
इति वायसाद्भुतं प्रथमप्रहरे ।
इति वायसाद्भुतं द्वितीयप्रहरे ।
इति वायसाद्भुतं तृतीयप्रहरे ।
इति स्वप्नाद्भुतम् ।
इति मिश्राद्भुतम् ।
इति कठ ··· ··· ··· भुतम् ।
इति जन्म दिनाद्भुतम् ।
इति श्रीमाधवविरचितोऽद्भुतदर्पणः समाप्यः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अद्भुतसागरः

क्रमाङ्कः १५६० विषयाङ्कः ५

ग्रन्थकारः- वल्लालसेनदेवः। नेपालीयं कागजम् देवनागरी लिपिः। पङ्क्तयोऽनियताः। आकारः १५×५½। ग्रन्थसंख्या ४१२५। पत्रसंख्या १४२। आद्यन्तौखण्डितौ।

अन्तवाक्यम्—

त्वाच्छब्दाः पर्यायवाचकाः।

अतो ऽन्यान्यप्यशुभसूचकाम्युत्पातेष्वन्तर्भवन्ति। अत एव यः प्रकृतिविपर्यासः प्रायः संक्षेपतः। इहवटकणिकायां वराहेण प्रायः शब्दः प्रयुक्त इति

अथोत्पातविवेकः तत्र पराशरः—

प्रकृतेर्भूतविकृतप्रादुर्भावा श्चोत्पातमाचक्षते। तेषां द्यौरन्तरिक्षं भूताश्चाश्रयः पञ्चभूतानि योनिः॥

अतो गर्गः—

प्रकृतेरन्यथोत्पातः संक्षेपस्तावदीदृशः।
त्रिविधः स तु विज्ञेयो दिव्यनाभसभूमिजः॥

पुष्पिकावाक्यानि -

इति श्रीमहाराजाधिराज निःशङ्कशङ्कर श्रीमद्वल्लालसेन देव विरचितेऽद्भुतसागरे सूर्याद्भुतावर्तः ॥ १ ॥
,, ,, चन्द्राद्भुतावर्तः ॥ २ ॥
,, ,, राह्वाद्भुतावर्तः ॥ ३ ॥
,, ,, मङ्गलाद्भुतावर्तः ॥४॥
,, ,, योगमार्गिये बुधे यावदद्भुतदर्शनम् ॥५॥
,, ,, बृहस्पत्यद्भुतावर्तः ॥६॥
,, ,, भार्गवाद्भुतावर्तः ॥७॥
,, ,, शनैश्चराद्भुतावर्तः ॥८॥

CC-0. Nepal Sanskrit Academy, Kathmandu

„ „ केत्वद्भुतावर्तः ॥९॥
„ „ सप्तर्ष्यद्भुतावर्तः ॥१०॥
„ „ ग्रहयुद्धाद्भुतावर्तः ॥११॥
„ „ कृत्यादियोगाद्भुतावर्तः ॥१२॥
„ „ रव्यादिवर्षाद्भुतावर्तः ॥३१॥
„ „ संवत्सराद्यद्भुतावर्तः ॥१४॥
„ „ ऋक्षाद्भुतावर्तः ॥१५॥
„ „ प्रतिसूर्याद्भुतावर्तः ॥१६॥
„ „ परिवेषाद्भुतावर्तः ॥१७॥
„ „ इन्द्रधनुरद्भुतावर्तः ॥१८॥
„ „ रश्मिदण्डाद्भुतावर्तः ।१९॥
„ „ गन्धर्वनगराद्भुतावर्तः ॥२९॥
„ „ निर्घाताद्भुतावर्तः ॥२१॥
„ „ सन्ध्याद्भुतावर्तः ॥२२॥
„ „ संध्याकालिकरविकिरणाद्भुतावर्तः ॥२३॥
„ „ दिग्दाहाद्भुतावर्तः ॥२४॥
„ „ „ ॥२५॥
„ „ तमोधूमरजो निहाराद्यद्भुतावर्तः ॥२६॥
„ „ उल्काद्भुतावर्तः ॥२६॥
„ „ विद्युदद्भुतावर्तः ॥२७॥
„ „ वाताद्भुतावर्तः ॥२९॥
„ „ मेघाद्भुतावर्तः ॥३०॥
„ „ मेघगर्भाद्भुतावर्तः ॥३१॥
„ „ प्रवर्षणाद्भुतावर्तः ॥३२॥
„ „ अतिवृष्ट्यद्भुतावर्तः ॥३३॥
„ „ कबन्धाद्भुतावर्तः ॥३४॥
„ „ भूकम्पाद्भुतावर्तः ॥३५॥
„ „ जलाशयाद्भुतावर्तः ॥३६॥
„ „ दीपाद्भुतावर्तः ॥३७॥
„ „ अग्न्यद्भुतावर्तः ॥३८॥
„ „ देवप्रतिमाद्भुतावर्तः ॥३९॥
„ „ शक्रध्वजाद्भुतावर्तः ॥४०॥

CC-0. Nepal Sanskrit Academy, Kathmandu

" " वृक्षाद्भुतावर्तः ॥४१॥
" " गृहाद्यद्भुतावर्तः ॥४२॥
" " वातजोपस्करद्भुतावर्तः ॥४३॥

अन्तवाक्यम् –

प्रार्थितोत्पत्तिर्वैशमलाभो धनागमो राज्यलाभः स्त्रीसंगमः सोमपानं क्रतुदीक्षा यज्ञफलावाप्तिविपुलार्थसम्पत्तिर्वेदनम् । अतः परं खण्डितम् ।

अद्भुतसागरः

क्रमाङ्कः ३४६ विषयाङ्कः ६

ग्रन्थकारः बल्लाल सेनदेवः । ताड पत्राणि । नेवारी लिपिः । पङ्क्तयः ४। आकारः २१×२ पत्रसंख्या ६८ । ग्रन्थसंख्या २८८४ अपूर्णः । ग्रहयुद्धाद् भुतावर्तादिवप्रतिमाद्भुतावर्तपर्यन्तः ।

अधिमासादिनिर्णयः

क्रमाङ्कः ६३१२ विषयाङ्कः ७

ग्रन्थकारः……………… । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ७ । आकारः ६×४ । ग्रन्थसंख्या १७५ । पत्र संख्या १३ । पूर्णः ।

आदिवाक्यम्—

श्रीसद्गुरुगणेशाभ्यांनमः

सिद्धान्तोदितराद्धान्तवासनाप्तस्वनेहसि ।
श्रौतस्मार्ताः क्रियाः सद्यो भवन्ति सफला यतः॥
तदनुष्ठानसिध्यर्थं श्रौतस्मार्त हितेच्छया ।
मया शिष्टजनस्वान्तह्लादाल्हादितजीविना ॥
मलामल(तु)मा(स)स्य वासनासिद्धमार्गतः ।
सिद्धान्तोदितराद्धान्तमवलंब्यात्र लिख्यते ।
द्वात्रिंशद्भिर्गतैर्मासैरित्यादि प्रकृतिवचनानि मध्यममानाभिप्रायकाणि.

CC-0. Nepal Sanskrit Academy, Kathmandu

अत एवोक्तं षडगनन्दैर्लब्धाधिमासकदिनै रित्यार्यभट्टेन।

अन्तिमं वाक्यम् —

शुक्ले वा यदि वा कृष्णे या तिथि र्यस्य जन्मनि।
ग्राह्या तत्पक्षगा सैव तिथिः प्राक् परमासगा॥
तिथ्यर्द्धे प्रथमे पूर्वा द्वितीयार्द्धे तदुत्तरा।
इति यद्वचनं तत्तु नृणां मरणजन्मनोः॥
मासप्रयुक्तकार्येषु न प्राक्परविभागतः।
कर्मणो यस्य यः कालस्तत्कालव्यापिनी हिता॥
तत्तन्मासोदितं कर्म क्षणसंसर्पसंज्ञयोः।
अनन्यगतिकं मत्वाऽनुष्ठेयं नित्यकर्मवत्॥
इतिश्रीगुरुणोद्दिष्ट धिमासादिविनिर्णयम्
यः पश्येत्स न मुह्येत श्रौतस्मार्तक्रियादिषु॥ शुभम्॥

अब्दप्रबोधः (भोजदेवसंग्रहो वा)

क्रमाङ्कः ७०८ विषयाङ्कः ८

ग्रन्थकार-दामोदरः। ताड़पत्राणि। नेवारी लिपिः। पङ्क्तयः ६।
आकारः १२×२। ग्रन्थसंख्या १८६६ पत्रसंख्या ७६। पूर्णः।

आदिवाक्यम् —

नमः सर्वज्ञाय

सर्वज्ञमव्ययमनादि मनन्तमीशं मूर्ध्नाऽभिवन्द्य वचनैर्विविधै र्मुनीनाम्
आब्दप्रबोधमुदयज्ञ मुदानिदानं दामोदरो व्यरचयद्गुणिनः क्षमध्वम्
करबदरसदृशमखिलं लिखितमिव तन्निषिक्तमिव हृदये।
सचराचरत्रिभुवनं यस्य स जीयाद्वराहमिहिरमुनिः॥
स्वल्पाभिधेयविपुलाभिधानबहुसङ्ग्रहे रजात मुदः।
लघुमलघुवोच्यसङ्ग्रहमवदधतु सुपद्यगद्यमिमम्॥
श्रीभोजदेवनृपसङ्ग्रहसर्वसारं, सारञ्च संग्रहगतस्य वराहसाम्यात

CC-0. Nepal Sanskrit Academy, Kathmandu

पुष्पिका वाक्यानि- —

इति कालविभागः।
〃 वर्षादिफलम्।
〃 सपरिकरणनक्षत्रचिन्ता।
〃 राशिचिन्ता।
〃 तिथिकरणचिन्ता।
〃 भोगचिन्ता।
〃 सग्रहतारकाचिन्ता।
〃 संक्रान्तिचिन्ता।
〃 शुद्धिचिन्ता।
〃 बलबन्धः।
〃 गर्भाधानविधिः।
〃 पुंसवनसिमन्तकर्मणी।
〃 शिष्टचिन्ता।
〃 शशिरिष्टभङ्गः।
〃 जातकविधिः।
वृद्धिश्राद्धम्।
〃 नामकरणम्।
〃 पूगभक्षणम्।
〃 निष्क्रमणम्।
〃 अन्नप्राशनम्।
〃 नवान्नभक्षणम्।
〃 कर्णवेधः।
इति विद्यारम्भः।
〃 व्रतबन्धः।
〃 वन्हि परिग्रहः।
〃 धनुर्वेदः।
〃 प्रश्नोद्देशः।
〃 विवाहवर्षशुद्धिः।
〃 देशाचारशुद्धिः।
〃 रविविशुद्धिः।
〃 गुरुशुद्धिः।

CC-0. Nepal Sanskrit Academy, Kathmandu

चन्द्रशुद्धिः ।
^ अष्टवर्गचिन्ता ।
^ मासादिचिन्ता ।
^ घटनविधिः ।
^ हस्तोदकम् ।
^ नववधूयात्रा ।
^ प्रतिशुक्रादिचिन्ता ।
^ सिंहबृहस्पतिचिन्ता
^ शङ्खादि परिधानम् ।
^ परिधानम् ।
^ यात्रायां वारचिन्ता ।
^ यात्रायां नक्षत्रादिचिन्ता ।
^ यात्रायां लग्नादिचिन्ता ।
^ ललाटियोगचिन्ता ।
^ यात्राभङ्गयोगः ।
^ व्यतिपातादिचिन्ता ।
^ प्रस्थानविधिः ।
^ वास्तुविद्या ।
^ गृहाद्यर्घविधिः ।
^ गृहप्रवेशः ।
^ प्रतिष्ठाविधिः ।
^ कूपखननविधिः ।
^ वृक्षारोपणपुण्यम् ।
^ कृषिचिन्ता ।
^ भैषज्यभक्षणम् ।
^ गदमुक्तिस्नानम् ।
^ वस्त्रप्रक्षालनम् ।
^ दोलाद्यारोहणम् ।
^ करिदन्तकल्पनम् ।
^ गोचालनादिविधिः ।
^ श्रवणादिचिन्ता ।
^ तैलोपभोगफलम् ।
^ क्रयविक्रयचिन्ता ।

CC-0. Nepal Sanskrit Academy, Kathmandu

" नौकादिशिल्पक्रिया।
" परीक्षादेवस्पर्शनविधि

श्रीश्रीभोजदेवनृपसर्वसारसंग्रहे भोजदेवनाम पुस्तकमिदं समाप्तम्ः ने. संवत् ४७२ कार्तिक कृष्णपञ्चम्यां परतः षष्ठ्यां तिथौ मघा नक्षत्रे, ब्रह्मयोगे बुधवासरे शुभलग्ने समाप्तम् ॥

अब्दप्रबोधः (भोजदेवसंग्रहो वा)

क्रमाङ्कः ७०२

विषयाङ्कः ६

ग्रन्थकारः- दामोदरः। ताडपत्राणि। नेवारी लिपिः। पङ्क्तयः ६। आकारः १२×१३। ग्रन्थसंख्या १४६४। पत्रसंख्या ६५। खण्डितः।

अन्तिमं वाक्यम्-

ताष्वेव श्रवणे मासि यदि वर्षति वर्षति।
प्रतिपद् बहुलायाश्चित्रवृष्टिस्तु वर्षस्य गर्भलक्षणम्।
श्रीभोजदेवसङ्ग्रह समाप्तः।
राजाधिराजपरमेश्वरपरमभट्टारकभास्करकुलः श्रीश्रीजययक्षमल्लदेवस्य विजयराज्ये श्रेयोऽस्तु। श्रीनेपालसंवत्सरः ४७३ ज्येष्ठकृष्णचतुर्दश्यां शनैश्चरवारे उत्तराषाढापरतः श्रवणनक्षत्रे ऐन्द्रयोगे तस्मिन्दिवसे लेख समाप्तिमगात्।

अमितसिद्धावतारसंहितायां मेघोत्पत्त्यध्यायः

क्रमाङ्कः २६६१

विषयाङ्कः १०

ग्रन्थकारः ..... । मध्यदेशीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः ३। आकारः १०×४। ग्रन्थसंख्या १२५०। पत्रसंख्या ..... मध्यखण्डितः।

आदिवाक्यम्-

श्रीसरस्वत्यै नमः

नित्या भाषदमी नराधिपतयो यान्ति प्रजा पुत्रवान्।
तावन्नीति विदः स्वधर्मे सहिता स्तावन्मुनीनां तपः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

तावन्मित्रकलत्रपुत्रपितरः स्नेहेषु तिष्टंति ते ।
यावच्च प्रतिवत्सरं जलधरः क्षोणीतले वर्षति ॥
मेघो महेश्वर रन्यानि मेघमालाविनिर्णयम् ।
ग्रहोदयास्तमाचारं ग्रहराज विवक्षणा ? ॥
रोहिणीमूलयोगश्च वत्सरा पर्वणितथा ।
मूलोदयं ग्रहश्चैव नाडीभेदं वद प्रभो ॥
देशभंगं समासेन वायुधारणनिर्णयम् ।
ऋक्षभेदं समासेन मेघगर्ज जलावह ॥
वर्षते चाप्यवर्षन्ति येन जानन्ति साधकाः ।
विद्युदुभेद समायुक्ता जलयोगात्र संस्थिताः ॥
कूर्मपृष्ठि (ष्ठ) समादेशा शुभा चात्वंशुभानि च ।
सस्यनिष्पत्तिसंयोगद्रु (द्रो) णसंज्ञो जलस्य च ॥
आषाढ़ा (पूर्वाषाढा) मारुत श्चैव स्वातियोगं तथै व
ज्येष्ठसृष्टि प्रवर्द्धन्ते तन्मे कथय भैरव ॥

श्रीभैरव उवाच

पूर्वरेखान्तरे भानुर्यदा ग्रहनिशाकरौ ।
विन्दुभेदं न कुर्वन्ति ब्रह्मचर्येण संस्थिताः ॥
अन्योऽन्यं मौनमिच्छन्ति स्पृष्टास्पृष्टं नकारयेत् ।
द्वादशाब्दं पुरा देवियोगहीना न वर्षते ॥

पुष्पिकावाक्यानि -

इति राजफलम् ।
इति मन्त्रिफलम् ।
इति सस्याधिपफलम्
इति ब्रह्मव्यंशतिकाफलम् ।
इति विष्णुव्यंशतिकाफलम् ।
इति ब्रह्मविष्णु रुद्रव्यंशतिकाफलम ।
इति मेघेनीउदकग्रहलक्षणम् ।
इति श्रीअमितसिद्धावतारे सर्वरत्नसमुच्चये निर्वाणपुराणे शतको
टि प्रमाणसंहितायां मेघोत्पत्ति मेघ निर्णयो नाम वञ्वमोऽध्यायः
इति कूर्मचक्रफलम् ।
इति क्षत्रभङ्गचक्रं समाप्तम् ।
इति गुरुचारः संपूर्णः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

इति महामाहेश्वरी मेघमाला समाप्ता ।

इति ग्रहणे अभ्रज्ञानम् ।

इति फणींश्वरचक्रम् ।

इति गुरुवारफलम् ।

इति गुरुवारनक्षत्रफलम् ।

अर्घकाण्डम् ।

इति वसन्तराजशाकुने पल्लीशरठादिफलम् ।

संवत् १६४४ शाके १५०९ प्रवर्तमाने षष्ट्यब्दमध्ये मन्मथनाम संवत्सरे मालपकदेशे मुद्गलपातसाहश्रीअकबरराज्ये उचनुदसमीपे सोनकलग्रामे श्रीजयसागरसूरिणा मेघमालाग्रन्थो लिखितः ।

अरिष्टनवनीतं सटीकम्

क्रमाङ्कः २६१३ विषयाङ्कः ११

ग्रन्थकारः—नवनीतनर्तनकविः । टीका श्रीधरः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः १२ । आकारः १०×४ । ग्रन्थसंख्या ४०५ । पत्रसंख्या १४ । अन्त्यखण्डितम् ।

आदिवाक्यम्—

श्रीरङ्गेशं नत्वा होराशास्त्राम्बुधीन्समालोड्यः ।
नवनीतं नर्तनकविररिष्टनवनीतमाजन्हे ॥
सुनिश्चितानिश्चितयोगजाख्यारिष्टान्यथो निश्चितमायुषान्तः ।
अनिश्चितं क्रूरदशादियोगो योगोद्भवं जन्मनि खेटगत्या ॥
द्रेष्काणनक्षत्रनवांकखेटैः श्चतुर्विधं जन्मविधावरिष्टम् ।
पाकोष्टभेद स्तनये सहोत्थे, पित्रोश्च तद्भ्रातृतदीश्वरे च ॥
इति साधारणपरिपृच्छा ।

व्याख्यायाम् –

श्री । अरिष्टनवनीतं यद्धोराशास्त्रात्समुद्धृतम् ।
व्याख्या विरच्यते तस्य श्रीधराख्या मनोहरा ॥
अथ प्रथमं प्रबन्धारम्भेऽभिमतदेवतां नमस्कृत्य प्रबन्धसंज्ञा कर्तृसंज्ञां च प्रकाशयति ॥ श्रीरंगेशमिति, अरिष्टनवनीतमरिष्टसारमरिष्टम-

CC-0. Nepal Sanskrit Academy, Kathmandu

तिमरणसूचकमशुभम् ॥

तथोक्तं वैजयन्त्यां रिष्टारिष्टे शुभाऽशुभे इति ।

पुष्पिकावाक्यानि —

इति श्रीधराख्येऽरिष्ट नवनीतव्याख्याने प्रथमपरिच्छेदः ।

,, ,, मात्ररिष्ठपरिच्छेदो द्वितीयः ।

,, ,, पित्ररिष्टपरिच्छेद स्तृतीयः ।

,, ,, सर्वारिष्टपरिच्छेदश्चतुर्थः ।

अन्तवाक्यम् -

वक्र शनिर्वा व्ययगोऽक्षिहन्ता वामं कुजो दक्षिणमक्षि सौरिः ॥

व्याख्यायाम् —

अथ नयनारिष्टयोगा प्रोच्यन्ते तत्र श्लोकार्द्धेन योगमाह, वक्र इति सूतिकाले शनिर्द्वादशगत शनि दक्षिणनयनं हंति तत्र कुजो वाम नयनं हंतीत्यर्थः ॥ ४५ ॥

अतः परं खण्डितम् ।

अर्घकाण्डम्

क्रमाङ्कः २६६२ विषयाङ्कः १२

ग्रन्थकारः हेमप्रभसूरिः । नेपालीयं कागतम् । देवनागरि लिपिः । पङ्क्तयः ६ ॥ आकारः १०½ × ४½ । ग्रन्थसंख्या २३४ । पत्रसंख्या १४ । पूर्णम् ।

आदिवाक्यम् -

श्री गणेशायनमः ॥ अथार्घकाण्डः । तत्र त्रिकपञ्चकयोगो विस्तरतो व्यांख्यायते—

स्नात्वाद्यागस्तंयुक्तमश्विन्यादित्रिकं पुनः ।

निःक्रस्त त्रयं पूर्णमिदं सर्वं काण्डविशारदैः ॥

मृगादित्रिकं चापि धनिष्ठापञ्चसंयुतम् ।

पञ्चकं नामसंज्ञेयमर्घनिर्णयहेतुकम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

त्रिकयोगे त्रिको योग पञ्चके पञ्चक पुनः ।
गृह्यते च त्रिकेयोगे दीयते पञ्चके धनम् ॥

पुष्पिकावाक्यानि —

इति महामण्डलेश्वरश्रीगुरुदेवेन्द्रसूरिशिष्यहेमप्रभसूरिविरचितेऽर्घकाण्डे त्रिकपञ्चकयोगो दर्षितः ॥

इति महामण्डलेश्वरगुरुदेवेन्द्रसूरिशिष्यश्रीहेमप्रभसूरिविरचितेऽर्घकाण्डे त्रिकपञ्चकयोगाषाढीयोगरोहिणीयोगाः ॥

इति मण्डलपद्धतिः ॥

इति देवेन्द्रसूरिशिष्यहेमप्रभसूरिविरचिते चैत्राद्यर्घकाण्डः समाप्तः ।
इति हेमप्रभसूरिकृतं मेघमालापटलम् ॥

अर्घकाण्डम् (ब्रह्मयामलोक्तम्)

क्रमाङ्कः ३००० विषयाङ्कः १२

ग्रन्थकारः ... ... । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ११ । आकारः १०×५ । ग्रन्थसंख्या ३८ । पत्रसंख्या २ । पूर्णम् ।

आदिवाक्यम् —

श्रीगणेशायनमः । अथ ब्रह्मयामलोक्तोऽर्घकाण्डप्रारम्भः ।

अथार्घं तं प्रवक्ष्यामि यदुक्तं ब्रह्मयामले ।
एकाशीतिपदे चक्रे ग्रहवेधाच्छुभाशुभम् ॥
देशः कालस्तथा पण्यमिति त्रीण्यर्घनिर्णये ।
चिन्तनीयानि वेध्यानि सर्वकालं विचक्षणैः ॥
देशोऽथमण्डलं स्थानमिति देशस्त्रिधोच्यते ।
वर्षं मासो दिनं चेति त्रिधाकालोऽपि कथ्यते ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

अन्तिमं वाक्यम्—

भूमिकंपो रजः पातो रक्तवृष्टिश्च जायते ।
देशे सर्वसुखोपेते वेधादर्द्धं वदेद्बुद्धः ॥॥
दीपो यथा गृहस्यान्ते प्रद्योतयति सर्वतः ।
तथेदं सर्वतोभद्रचक्रं ज्ञानप्रकाशकम् ॥
इत्यर्घकाण्डं समाप्तम् ।
संवत् १६०३ मार्गशीर्ष शुदि ६ भौमे ॥

अश्वयानेरविविधुगणा

क्रमाङ्कः ३०१७ विषयाङ्कः १४

ग्रन्थकारः – मल्लारिः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयोऽनियताः। आकारः $8\frac{1}{2}\times3\frac{1}{2}$ । ग्रन्थसंख्या ५० । पत्रसंख्या ३ । पूर्णा ।

आदिवाक्यम् -

श्रीः । तमीशं मूर्ध्नि विभ्राणं तमीशं च गुरुं भजे ।
तमीशं मूर्ध्निविभ्राणं तमीशोत्थं च खेचरान् ॥
राज्ञासुखासनगतेन जलद्रुस्त पृष्ठो द्विजो नहि रविर्न विधुग्रहः किम् ।
हस्त्यश्वयानरथपत्तिखुरोत्थधूलिव्याप्तान्तरं च गगनं नहीदम् ।
इत्युक्ते गणकेन भूमिपतिना पृष्ठं पुन स्यात्कदा
पर्वाचक्ष्व सविस्तरं ग्रहमुखं कस्यां दिशि स्यादिति ।
श्रुत्वा राजगिरं हयोपरि कथं वाच्यो ग्रहो मानसे
कृत्वेत्थं नृपभीतिविव्हलतनुर्जातस्तदा दैववित् ॥
तस्माद्वच्मि रवीन्दुपर्व गणकानंदार्थमत्यद्भुतम्
पश्चाङ्गं गणकेन धार्यमखिलं हस्ते द्वितीये गुणः ।
अश्वाकर्षणजस्ततो ग्रहयुगं वाच्यं विनोदाय भू—
पालानां सकलं स्फुटार्थ सहितैः वृत्तैः खरासप्रभैः॥

CC-0. Nepal Sanskrit Academy, Kathmandu

पुष्पिकावाक्यानि--

इति दैवज्ञमल्लारिविरचितो विधुग्रहः ॥

इति दैवज्ञमल्लारिविरचितो रविग्रहः ॥

इति दैवज्ञमल्लारिविरचितः परिलेखः समाप्तः ॥

अष्टमलग्नदोषलेखः

क्रमाङ्कः ६३२२ विषयाङ्कः १५

ग्रन्थकारः – — —। नेपालीयं कागतम्। देवनागरी लिपिः। पङ्क्तयोऽनियताः। आकारः १०×४। ग्रन्थसंख्या ११५। पत्रसंख्या ३। पूर्णप्रायः।

आदिवाक्यम् —

अथाष्टमलग्नदोषमाह वसिष्ठः -

यस्याष्टलग्ने तदधीश्वरे वा राशौ तदीशे च विलग्नगे वा ।
समृत्युमाप्नोति यथा मनोजस्त्रिनेत्रकालान्तकवह्निनेव ॥

अन्तिमंवाक्यम्—

अत्र यद्यपि साधारण्येनोपचयमुक्तं तथापि षष्ठगतलग्नेशस्य त्याज्य प्रकरणे शत्रुकृतप्रहारादिनामकरणफलमुक्तम् अत उपचये विषष्ठा उपचया ग्राह्याः।

उक्तं देवलेन —

पापश्चेद्यदि लग्नेशो विषष्ठोपचयर्क्षगः।
बलवानखिलं दोषं हत्वा चोपचयं दिशेदिति।

CC-0. Nepal Sanskrit Academy, Kathmandu

अष्टकवर्गनिरूपणम्

क्रमाङ्कः- ७४०६ विषयाङ्कः-१६

ग्रन्थकारः- ... ... । नेपालीयं कागतम् । देवनागरी लिपि । पङ्क्तयोऽनियताः । आकारः १०३/४×४१/२ । ग्रन्थसंख्या ७६५ । पत्रसंख्या १५ । अन्त्यखण्डितम् ।

आदिवाक्यम्—

लग्नस्य पूर्वार्द्धगता १० । ११ । १२ । १ । २ । ३ नभोगाः फलं प्रदद्युस्त्वपरार्द्ध परोक्षकं ते । षट्को ४ । ५ । ६ । ७ । ८ । ९ । पगताः परोक्षं फलं वदंतीति बुधाः पुराणा ॥ पश्येद्विलग्नं यदि लग्ननाथः कार्याधिपः कार्यगृहं प्रपश्येत् । लग्नाधिपः कार्यगृहं प्रपश्ये कार्याधिपो लग्नगृहं च यद्वा ॥

अन्तिमंवाक्यम्—

लग्नात्तु मंदोत्तमथो फलानामैक्यं शनेर्लग्नमुपान्त्यमेव ।
तद्योगतुल्ये शरदीहकाले व्याधिं मृतिं वा परदेशयानम् ॥
धनक्षयं तत्प्रतितुल्यवर्षे तद्योग रोगाब्दसमे तु कष्टम् ।
सामर्थ्य ... .

अतः परं खण्डितम् ।

अष्टकवर्गविचारः

क्रमाङ्कः-७४२३ विषयाङ्कः-१७

ग्रन्थकारः- ... ... — - । मध्यदेशीयं कागतम् । देवनागरी लिपिः पङ्क्तयोऽनियताः । आकारः १०×५१/२ । ग्रन्थसंख्या ४०० । पत्रसंख्या १८ । आदिखण्डितः ।
संवत् १९०८ माघ वदि २ भृगौ दीनानाथेन लिखितं शुभम् ।

अष्टकवर्गादिसंग्रहः (नेवारीभाषात्मकः)

क्रमाङ्कः-७४३० विशयाङ्क १८

ग्रन्थकारः—सुग्रीव । नेबालीयं कागतम् । देवनागरी लिपिः । पङ्क्तय ९ । आकारः ८१/२×५१/२ । ग्रन्थसंख्या २१० पत्रसंख्या १६ । पूर्णः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अष्टोत्तरी दशाफलम्

क्रमांक : ७४२१ विषयांक : १६

ग्रन्थकारः — ... — — । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयोऽनियताः । आकारः $८\frac{1}{2}×५\frac{3}{4}$ । ग्रन्थसंख्या १११ । पत्रसंख्या १६ । अन्त्यखण्डितम् । जीर्णं शीर्णञ्च ।

आर्यासप्ततिः

क्रमाङ्कः ७०६७ विषयाङ्कः २०

ग्रन्थकारः भट्टोत्पलः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयोऽनियताः । आकारः । १०×४ । ग्रन्थसंख्या ७५ । पत्रसंख्या ४ । पूर्णः ।

आदिवाक्यम्—

श्रीमहामङ्गलमूर्तये नमः

रविशशि कुजबुध गुरुभृगु रविजगणेशान्प्रणम्य भक्त्यादौ । ... ...
वक्ष्येऽहं प्रश्न ज्ञानं हिताय दैव विदाम् ॥
दश भेदं ग्रहगणितं जातक मवलोक्य निरवशेषम् ।
यः कथयति शुभमशुभं तस्य नमिथ्या भवेद्वाणी ॥

पुष्पिकावाक्यानि —

भट्टोत्पलविरचिता आर्यासप्ततिः समाप्तः ।

आयुर्दायोदाहरणम्

क्रमाङ्कः २६०६ विषयाङ्कः २१

ग्रन्थकारः— सुब्रह्मण्यो नैलकविः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः १२ । आकारः $१०×\frac{1}{2}$ । ग्रन्थसंख्याः ३०० । पत्र संख्या १२ । पूर्णम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

आदिवाक्यम्-

श्रीगणेशाय नमः ।। आयुर्दायोदाहरणम् ।

पूर्वाचार्यान्नमस्कृत्य जैमिनेः सौत्रजातके ।
आयुर्दायोदाहरणं कुर्वे बालोपकारकारकम् ॥
अथ श्रीमज्जैमिनिजातकानुसारेणायुर्दायादिफल विचारः क्रियते ।

अन्तिमं वाक्यम्—

सुब्रह्मण्यो नैलकविर्जैमिनिप्रोक्तजातके ।
आयुर्दायोदाहरणं बालव्युत्पत्तयेऽकरोत् ॥
संवत् १६०६ मार्गशीर्ष कृष्ण प्रतिपदि गुरुदिने वाराणस्यां पाण्डयो पाख्यदेवनंदशर्मणा लिखितम् ।

इन्द्रध्वजोत्सवनिर्णयः

क्रमाङ्कः ६३१४ विषयाङ्कः २२

ग्रन्थकारः — — — । नेपालीयं कागतम् देवनागरी लिपिः ।
पङ्क्तयोऽनियताः । आकारः ६½×४½ । ग्रन्थसंख्या ... ।
पत्रसंख्या २ । अपूर्णः ।

आदिवाक्यम्—

श्रीः । अथ इन्द्रध्वजोत्सवनिर्णयः ।

रवौ हरिस्थे द्वादश्यां श्रवणेन बिडौजसम् ।
आराधयेन्नृपः सम्यक् सर्वविघ्नोपशान्तये ॥
भाद्रशुक्लायां द्वादश्यां श्रवणयुक्तायां शक्रध्वजोत्सव उक्तः । तत्र प्राशस्त्यपरमिति श्रवणयोगानियामक त्वात् ।

अन्तिमं वाक्यम्—

फलदधिघृतलाजक्षौद्रपुष्पार्घहस्तैः
प्रणिपतितशिरोभिः स्तूयमानैश्च पौरैः ।
वृतमनिमिषभर्तुः केतुमीशः प्रजाना-
मधिनगरलताग्रं कारयेत्तद्ध्वजाय ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

नातिद्रुतं न च विलम्बिमध्यमान-
मध्वस्त माल्यपिटकादिविभूषणं च ।
उत्थानमिष्टमशुभं वदतोऽन्य थास्या :
तच्छांतिभिर्नरपतेः शमयेत् पुरोधाः ॥

इष्टकालशोधनम् (निषेकोदाहरणम् च)

विषयाङ्कः २३

क्रमाङ्कः ८६२

ग्रन्थकारः - नित्यानन्दः । उदाहरणं वेदाङ्गराजः । नेपालीय कागतम् । देवनारी लिपिः । पङ्क्तयोऽनियताः । १०×४ । ग्रन्थसंख्या १०० । पत्रसंख्या ३ । पूर्णम् ।

आदिवाक्यम् -

श्रीगणेशाय नमः । अथ नित्यानन्द कृतमिष्ट शोधनमुच्यते ।
व्यङ्गाब्जलिप्ताः साब्ध्यष्टां ८४ शाष्टयङ्गनवेन्दुभिः १६६७१६ ।
खाभ्रगजै ८०० र्भक्ता गर्भस्थोहर्गणः स्थिरः ॥
विचन्द्राङ्ककलाः स्वाब्धि गजां ८४ शाढ्याविहीनिताः ।
त्रिनगाक्षाष्टभूपक्षात् २१८५७३ खखाष्टा ८०० प्ता अहर्गणः

अन्तिमं वाक्यम् —

इति जातः शुद्ध इष्टकालः ।
इति नित्यानन्दमतानुसारेण इष्टकालशोधनम् ।
शाके १७८६ संवत् १९२१ रुद्रवेदेन लिखितम् ।

इष्टशोधनम्

विषयाङ्कः २४

क्रमाङ्कः २८६३

ग्रन्थकारः—नित्यानन्दः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयोऽनियताः । आकारः ११½×५ । ग्रन्थसंख्या ६५ । पत्रसंख्या ३ । अपूर्णम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

इष्टकालशोधनम्

क्रमाङ्कः २८६२ विषयाङ्कः २५

ग्रन्थकारः .... । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयोऽनियता । आकारः ११×४½ । ग्रन्थसंख्या १३५ । पत्रसंख्या ४ । प्रकीर्णम् ।

उच्चवादो लग्नवादश्च

क्रमाङ्कः ३०१६ विषयाङ्कः २६

ग्रन्थकारः-बालकृष्णमिश्रस्तथा गिरधारीमिश्रः । मध्यदेशीयं कागतम् । देवनागरी लिपिः पङ्क्तयोऽनियताः । आकारः ६½×३½ । ग्रन्थसंख्या ३७ । पत्रसंख्या २ । पूर्णः ।

आदिवाक्यम् ..

अत्रोच्चवादः । अथ ग्रहाकर्षकविशेषोच्चपदवाच्यस्य स्थानं तत्तद्ग्रहकक्षासु वा तदधस्थस्तदूर्ध्वंवेतिकल्पत्रयम् । तत्र नाद्यो नापि द्वितीय उच्चभगणेभ्यो ग्रहभगणानामत्यधिकत्वात, उच्चसंज्ञा वैयार्थापित्तेश्च नापि तृतीयः । किञ्चिदूर्द्ध कल्पनया तावदुच्चभगणानामनुपलब्धेरत्यूर्द्ध कल्पनया तूच्चकर्तृ कातिदूररतो ग्रहापकर्षणेनैव हेतु भूतेनग्रहस्योर्द्ध कक्षान्तराललंबन संभवात् ।

पुष्पिका—

इति वेदवृक्षबालकृष्णमिश्रविरचितोच्चवादविचारः

अथ लग्नवादः । अहो लग्नंनाम किम् । लगति लग्नम्, लग्नशब्देन कः पदार्थः कुत्र लगतीति चेच्छृणु । गोले तत्तद्वृत्ते भांशानां सत्वात्तेषां मध्ये यः प्रदेशः लगति तल्लग्नमित्युच्यते । न च पूर्वकृतव्युत्पत्या न राशीनामेव लग्नत्वम् परं ग्रहर्क्षादिनामपि लग्नत्वं तत्कथं राशीमामेवेति वाच्यं, लग्नशब्दस्य राशिपरत्वात् । अत एव राशीनोमुदयो लग्नमिति संगच्छते ।

CC-0. Nepal Sanskrit Academy, Kathmandu

पुष्पिका —

इतिश्रीगुरुदुर्गाशंकरपण्डितचरणात्तबोधमैथिलगिरधारीमिश्र कृतो लग्नवादः समाप्तः ।

उडुदायप्रदिपः (पराशरजातकं वा)

क्रमांक : ५६०६ विषयांक : २७

ग्रन्थकारः— पराशरः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः १३ । आकारः १०×५ । ग्रन्थसंख्या २३४ । पत्रसंख्या १० । पूर्णः ।

आदिवाक्यम्—

सिद्धान्तमौपनिषदं सिद्धान्त परमेष्ठिनः ।
शोणाधरं महः किञ्चिद्वीणाधरमुपाष्महे ॥
वयंपाराशरीहोरामनुस्मृत्य यथामति ।
उडुदायप्रदीपाख्यं कुर्मो दैवविदां मुदे ॥

टीकायां—

श्रीगणेशाय नमः

श्रीगजास्यं नमस्कृत्य सिद्धिबुद्धिप्रदायकम् ।
पाराशरीजातकस्य टीका च क्रियते मया ॥
क्षत्रान्वये विष्णुदासस्तेनाहं प्रार्थितः किल ।
पाराशरीजातकस्य टीकांकृत्वा समार्पय ॥
गूढार्थान् प्रकटीकृत्य शेषं च सुखबोधकृत् ।
पाराशरीजातकस्य टीकां च लिख्यते मया ॥

सिद्धान्तमिति— उपनिषत्सु प्रतिपाद्यमानं सिद्धान्तं च परमेष्ठिनः ब्रह्मणः सिद्धान्तं च शोणाधरं शोणो रक्तः अधरौष्ठो यस्य तत् वीणाधरं वीणाधारणशीलं किञ्चित् किञ्चन महतेजः सरस्वती रुपमितियावत्, उपास्महे उपासनां कुर्मः कुतः ग्रन्थसमाप्तौ विघ्नविघातायेत्यर्थः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

अन्तिमंवाक्यम्...

पाराशरीजातकस्य व्याख्यानंतु मयाकृतम् ।
श्रीविष्णुदासस्यमुदे परमाद्यसुखेन च ॥
इति पाराशरजातके उडुदायप्रदीपाख्याने समाप्तम् ।
संवत् १६०४ शाके १७६६ आश्विन वदी ४ भौमे ।

उडुदायप्रदीपः हिन्दीटीकासहितः

(पराशरजातकं वा)

क्रमाङ्कः ५६०२

विषयाङ्कः २८

ग्रन्थकारः- पराशरः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयोऽनियताः । आकारः १० × ४½ । ग्रन्थसंख्या १८० । पत्र संख्या ६ । अन्त्यखण्डितः ।

उडुदायप्रदीप उद्योतसहितः

क्रमाङ्कः ४८६३

विषयाङ्कः २६

टीकाकारः- भैरवदत्तः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ११ । आकारः १०×४ । ग्रन्थसंख्या ८२५ । पत्रसंख्या २७ । पूर्णः ।

आदिवाक्यम्—

श्रीगणेशाय नमः

श्रीलक्ष्मीरमणं गणेशमभयं श्रीमद्गुरुं शारदां
सूर्यादिग्रहमण्डलं सविनयं नत्वा विदां प्रीतये ।
ज्योतिश्शास्त्रकला कुतूहलरति स्वस्वत्प्रबन्धानहं
वीक्ष्योद्योतमिमं तनोमि विशदंदायप्रदीपेऽमलम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

परमसुखमुदारं ज्ञातशच्छास्त्रसारं
विजित भव विकारं व्यक्तमुक्ति प्रकारम् ।
श्रुतिनयमविचारं भूरिशिष्यप्रचारं
गुरुमविनयहारं दृष्टपारं स्मराम ॥

क्वाहं मंदमतिः क्वशास्त्रधिषणा साध्यं सतां सम्मतं
ज्योतिः शास्त्र विविक्तदिष्टजफलं क्वासौ तदर्थोद्यमः ।
तानेव स्मृतिगोचरान्गुरुकृपापीयूषधारा धरान्
मन्येहार्दकूबोध वन्हिबहुलज्वालैक निर्वापकान् ॥

अथ तावत्पौर्वदेहिक धर्माधर्माधीनजन्मनो जीवजातस्यानागत धर्माधर्मफलविवक्ष्यया नाना जातकशास्त्राणि परमर्षयः प्रणिन्युस्तत्र परमकारुणिको भगवान् पराशरः प्रारब्धस्य फलानुमेयतया फलव्यभिचारेऽनुमानव्यभिचारात्पूर्वाचार्याणां ग्रन्थेष्वनुमानाभासत्वमालो ... ... जातकविशेषं प्रणिनाय तमेवजातकविशेषं कलौ पाराशरस्मृतिरिति न्यायसामान्यदव्यभिचरि ... .

अन्तिमंवाक्यम्

जपहोमग्रहो याऽस्ति देवद्विज गवार्चनैः ।
नश्यत्यमंगलं सर्वं कुदशा ग्रहसंभवमिति ॥

यद्वंशेनर्हि मूढतामुपगतो ना पण्डितो नाऽधनो
नो दीनो न च दुःखितो न पणसा हीनो नवा दुर्बलः ।
नापूज्यो न च राजमान विधुरो ना संततिर्नामतिः
सोऽयं सूरि पराशरो मुनिवरो वर्वर्ति सर्वोपरि ॥

तदन्वये शुद्धमतिः सनाढ्यः सद्वासनाढ्यो धिषणो धयाढ्यः ।
पाण्डेयनामा गिरिधारिलालो वृन्दावनोद्दे शलसज्जरौल्याम् ॥

तस्यात्मजः कुन्दननामशर्मा तदात्मजोऽभूद्धरिरामशर्मा ।
तदात्मजः स्वान्तनिविष्टरामः सिद्धान्तबिद्वै रवदत्तसूरिः ॥

अकारि तेनायमुडुप्रदीपोद्योतो गुरुक्ति प्रति सिद्धदोषः ।
विद्वज्जनानां गुणसद्मनानां भवेदनायासविलासहेतुः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

अभूद्भैरवसूक्तीनां लिपिकृद्धरणीधरः ।
महाभारतनिर्माणे व्यासस्येव गणेश्वरः ॥

इति श्रीभैरवदत्तविरचिते उडुदाय प्रदीपोद्योते संज्ञाध्यायः प्रथमः ।
,, ,, राजयोगाध्यायो द्वितीयः ।
,, ,, आयुर्दायाध्यायस्तृतीयः ।

इति श्रीमत्पण्डित हरिराम शर्मसूनुश्रीभैरवदत्त दैवज्ञविरचिते उडुदाय प्रदीपोद्योतेऽन्तर्दशाध्यायश्चतुर्थः समाप्तश्चायं ग्रन्थः ।
त्र्यङ्गाब्दसंमिते शाके राधेमासि भृगोर्दिने ।
दायप्रदीपोद्योताख्यमलिखद्वेदगर्भकः ॥

उमामहेश्वरसंवादरूपस्वरसूत्रं सभाष्यम्

क्रमाङ्कः ५५४ विषयाङ्कः ३०

ग्रन्थकारः ... . । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयोऽनियताः । आकारः $१५\times५\frac{१}{२}$ । ग्रन्थसंख्या ७२५ । पत्रसंख्या २७ । पूर्णम् ।

आदिवाक्यम् —

श्रीगणेशाय नमः

कदाचित्कैलासे रुचिरचितहासे प्रियतमं
पुरा पप्रच्छेदं निखिल — — मति परिहरन् ।
कृपां कृत्वा नाथ प्रचुनगुणनाथः स्थिरतरं
नृणां सिद्धिस्थानं कथय किमपि ज्ञानमतुलम् ॥

पुनर्देव ब्रह्माण्डमेतत्कथमुदितमभूत्केन संभूय भूयः
प्रोच्चैरुच्चादिदेशो प्रियतम, परितो वर्तते नर्तनेन ।
लीनं दीनं कथं वा भवति भवति तत्सर्व माहो प्रतीतं
ब्रह्माण्डाः पूर्व गोला स्तत मल रुचिरो निर्णयः कर्णमिष्टः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

ईश्वरउवाच

ब्रह्माण्डं जायते तत्त्वात्तत्त्वेनैव प्रवर्त्तते ।
विलीयेत तत्व एव तत्त्वाद्विश्वविनिर्णयः ॥

देव्युवाच

मूलं सर्वस्य तत्त्वं हि निर्णीतं तत्ववादिभिः ।
तत्त्वस्य तस्य रूपं तु तत्त्वमेव निरुपय ॥

शीवसूत्रमाह

आत्मा वेदितव्यः। अस्यार्थः— स्वरैच्छाविशिष्टस्य तद्रहितस्य च यस्य निर्गमप्रवेशौ स्तः अतति व्याप्नोतीत्यात्मेति।

इच्छा त एव तत्वानि। अस्यार्थः- शब्दादितन्मात्रासहितानि स्थूल रुपाण्याकाशादीनि जातानीति भावः। तानि चाकाश १ वायव २ ग्न्या ३ पो ४ भू ५। शब्दतन्मात्रात् आकाश इति संज्ञा जाता, निर्गमरुपश्च जातः शब्दरहितस्त्वात्मा प्रवेशरुप एव संतिष्ठते । अत्रायं क्रमः शब्दतन्मात्रातः स्पर्शतन्मात्रा, ततो रुपं ततो रस स्ततो गंधः, एवमाकाशाद्वायुर्वायोरग्निरग्ने रापस्ताभ्यः पृथ्वी ।

अन्तिमं वाक्यम्—

वाक्पाणिपादपायूपस्थः प्राणापानसमानोदानव्यानमनोबुद्धि इति कारिण शरीरेण सप्तदशतत्वानि शब्द स्पर्श रूपरसगंधा इति तन्मात्राभिः स्थूल शरीरम् ।

इति श्री उमामहेश्वर संवादे स्वरसूत्रभाष्ये संज्ञाध्यायः ।
संवत् १८२७ मिति माघवदी ११ शुक्रवासरे ।

कन्यापुत्रोत्पत्यादि प्रश्नज्योतिषम्

क्रमाङ्कः ४०३५ — विषयाङ्कः ३१

ग्रन्थकारः — मल्लारिः मध्यदेशीयं कागतम् । देवनागरी लिपिः ।
पङ्क्तयः६। आकारः ६½×३½। ग्रन्थसंख्या ४०। पत्रसंख्या ३ पूर्णम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अन्तवाक्यम् -

ष्टांतं वृश्चिकः । मूल पूर्वाषाढा उत्तराषाढाः पादं धनुः । उत्तराषाढा-त्रयः श्रवणधनिष्ठार्द्धं मकरः ।

अन्तिमं वाक्यम् —

कन्या गौः पूर्णकुम्भं दधिफलकुसुमं पानमानं च यानम् ।
वाऽश्वो विप्रस्य युग्मं नृपतिवर रथं ब्राह्मणं पुष्पहस्तम् ।
उक्षित्वा चैव पृथ्वीं जलधर विभजं सिद्धमन्नं शतायु
वैश्या स्त्री मद्यमांसं हितमपि वचनं पान्थवानां प्रशस्तम् ॥

कमलाकरीयसारणी

क्रमाङ्कः २६३३ विषयाङ्कः ३२

ग्रन्थकारः— कमलाकरः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयोऽनियताः । आकारः $10\frac{1}{2}\times4\frac{1}{2}$ । ग्रन्थसंख्या ... ...। पत्रसंख्या ४२ । आदिखण्डिता ।

करणप्रकरणम्

क्रमाङ्कः २६०५ विषयाङ्कः ३२

ग्रन्थकारः — — — । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ६ । आकारः $7\times3\frac{1}{2}$ । ग्रन्थसंख्या ४२ । पत्रसंख्या ८ । प्रकीर्णम् ।

करपञ्चाङ्गं मराठीभाषामयम्

क्रमांकः २६७८ विषयांकः ३४

ग्रन्थकारः — ... . । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ६। आकारः 10×5 । ग्रन्थसंख्या .. । पत्रसंख्या ५ । पूर्णम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

आदिवाक्यम्-

श्रीगणेशाय नमः। अथ करपञ्चाङ्गं लिख्यते।

नमुनि विघ्नहरा गुरुगौरवा सुमतिदा कुलदेवी नवार्णवा।
स्मरुनि या करवीरनिवासिनी ग्रथिलिहे तिथि सिद्धि असी जनि॥
सुगम स्पष्टवं अङ्क पत्र पाटी। चतुरां कौ करु पयाधि सांटी।
स्वगुरु श्रीधर अट विन चिती। करपञ्चाङ्ग अपूर्व पूर्व युक्तीः॥
इति करपञ्चाङ्गम् समाप्तम्।

कामधेनुः

क्रमाङ्कः ७४१६ विषयाङ्कः ३५

ग्रन्थकारः ... ...। नेपालियं कागतम्। देवनागरी लिपिः। पङ्क्तयः १०। आकारः ६½×५½। ग्रन्थसंख्या १०५। पत्रसंख्या ६। पूर्णम्।

आदिवाक्यम् –

श्रीगणेशाय नमः

विधिहरीशदिनेशगजाननान्
द्रुहिणजां गुरुपादसरोरुहम्।
सकलशास्त्र विबोधनकारणं
परमकारुणिकां तुलजां भजे॥

आदौ यन्त्रे जन्मकालं विलोक्य
तस्मात् खेटाश्वायनांशैः फलानि।
कार्या भावास्तत्फलान्यष्टवर्गा
मैत्री तत्कालोद्भवा सप्तवर्गा॥

होरादिनी कुण्डली सूर्यचन्द्र-
चक्रे षट्कोणं च सप्तर्क्षचक्रम्
सार्पं चैकाशीति चक्रं ग्रहाणां॥
रश्मिर्मध्ये स्पस्टमायुर्दशायाः

CC-0. Nepal Sanskrit Academy, Kathmandu

अन्तिमंवाक्यम्--

स्फूट तरो हिमगोः कलिकात्मजो-
खखगजै र्विभजेद्गतक्षकम्।
तदुडुमासगुणं च दिनादिकं
खखगजैर्विभजेत्फलषड्गुणम ॥

संवत् १८९४ शाके १७५९ चैत्रशुक्ल १ लिखितं व्यास दीनानाथेनऽऽत्मपठनार्थम्।

कामधेनुसारणी

क्रमाङ्कः ७४०८ विषयाङ्कः ३६

ग्रन्थकारः— श्रीगङ्गसोमः। मध्यदेशीयं कागतम्। देवनागरी लिपिः। पङ्क्तयो ऽ नियताः। आकारः १०×४⅚। ग्रन्थसंख्या " । पत्र संख्या २२।

संवत् १८२० शाके १६८४ प्रवर्तमाने मासोत्तमे मासे पौषमासे कृष्णपक्षे ७ तिथौ सोमवासरे मालवक्षेत्रमध्ये

कालज्ञानम् (योगरत्नावल्यन्तर्गतम्)

क्रमाङ्कः ६३३३ विषयाङ्कः ३७

ग्रन्थकारः- ... ...। मध्यदेशीयं कागतम्। देवनागरी लिपि। पङ्क्तयः ८।६ आकारः ।ग्रन्थसंख्या २००। पत्रसंख्या १६।

आदिवाक्यम् —

श्रीगणेशाय नमः

येषां हृदि स्फुरति शाश्वतमद्वितीयं
तेजस्तमोनिवहनाशकरं रहस्या ।

CC-0. Nepal Sanskrit Academy, Kathmandu

तेषामखण्डशशिकान्तिसुपुण्यभाजां
स्वप्नेऽपिनो भवति काल भयं नराणाम् ॥

शक्तिचारं महाज्ञानमानन्दं परमामृतम् ।
कालांतकं कलासारं निश्वासं च कलात्मिकम् ॥
योगजं मुखबिम्बं च वीणातंत्रं कलामृतम् ।
एतेषु योगतन्त्रेषु कालज्ञानं शिवाऽब्रवीत् ॥

अन्तिमं वाक्यम्—

नादं गुणं कलां चापं कृत्वा बिन्दुं शरं भ्रूमात् ।
शिवेनात्ममयोयस्मा छिध्यते वेध उच्यते ॥
कियन्तो गुरवः संति वाचालाः कपटपाटवाः ।
प्रौढाः प्रत्यंगवेधविबुधा द्विश न तु पञ्चधा जगति ॥
गुरो शिष्यस्य यन्नोक्तं लक्षणं तच्छिवागमात् ।
बोद्धव्यं यद्बतिर्यस्मादियं संक्षिप्तलक्षणात् ॥
इति योगरत्नावल्यां कालज्ञानादिविधिः सम्पूर्णः ॥

काश्यपसंहिता

क्रमाङ्कः ४५५५ विषयाङ्कः ३८

ग्रन्थकारः— कश्यपः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः १२ । आकारः १०×४$\frac{3}{2}$ । ग्रन्थसंख्या १६०० । पत्रसंख्या ४६ । पूर्णः ।

आदिवाक्यम्…

श्रीगुरुगणेशाभ्यांनमः

महेशाय नमस्तस्मै सच्चिदानन्दरूपिणे ।
नतामरकिरीटौघप्रभाविस्फुरितांघ्रये ॥

सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिः पराशरः ।
कश्यपो नारदो गर्गो मरीचिर्मनुरंगिराः ॥

रोमशः पौलिशश्चैव च्यवनो यवनो भृगुः ।
शौनकोऽष्टादशैवैते ज्योतिः शास्त्रप्रवर्तकाः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

स्कन्धत्रयात्मकं शास्त्रमाद्यं सिद्धान्तसंज्ञकम् ।
द्वितीयं जातकस्कन्धं तृतीयं संहिताह्वयम् ॥

ग्रहाणां मध्यमा भुक्तिः स्फुट भुक्तिरनन्तरम् ।
दिक्साधनं ततश्छाया लग्नकालविनिर्णयः ॥

चन्द्रार्कग्रहणं सम्यक् तयोश्च परिलेखनम् ।
समागमो युद्धभेदो ग्रहर्क्षाणां च संयुतिः ॥

उदयास्तमनं ज्ञानं चन्द्र शृङ्गोन्नतोन्नतिः ।
पातवैधृतयोर्भेदो भूगोलं यंत्रलक्षणम् ॥

यानक्रिया यानभेदा श्चाद्य स्कन्धे प्रकीर्तिताः ।
राशिभेदः खेटयोनिर्वियोनिर्जन्मलक्षणम् ॥

निषेको जननं पुंसामरिष्टं भंगलक्षणम् ।
आयुर्दायोदया भेदो भेदा श्चान्तर्दशादिषु ॥

अष्टवर्गः कर्मजीवो राजयोगा अनेकशः ।
चन्द्रयोगा द्विग्रहाद्या प्रव्रज्या योगसंभवाः ॥

राशिशीलं दृष्टिफलं ग्रहभाव फलं ततः ।
नौ कूटाद्याश्च ये योगा योगा संकीर्णसम्भवाः ॥

स्त्रीजातकं नष्टयोगं निर्णयं नष्टजातकम् ।
द्रेष्काणश्च क्रियायोगाद्वितीयस्कन्ध संभवाः ॥

आदौ शास्त्रोपनयनं खेटचारोऽब्दलक्षणम् ।
तिथिवासरनक्षत्रयोग तिथ्यर्द्ध लक्षणम् ॥

मुहूर्तोपग्रहः सूर्यसंक्रान्तिर्गोचरक्रमः ।
चद्रताराबलं चैव क्रियाः षोडश कर्मणा ॥

२ पुष्पिकावाक्यानि —

इति ब्रह्मर्षिकश्यपोक्तसंहितायां शास्त्रोपनयनाऽध्यायः ।

" " सूर्यचाराऽध्याः ।

" " चन्द्रचाराऽध्यायः ।

" " भौमचाराऽध्यायः ।

" " बुधचाराऽध्यायः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

" " गुरुचाराऽध्यायः ।
" " शुक्रचाराऽध्यायः ।
" " शनि चाराऽध्यायः ।
" " राहु चाराऽध्यायः ।
" " केतुचाराऽध्यायः ।
" " तिथ्यध्यायः।
" " वाराऽध्यायः ।
" " नक्षत्राऽध्यायः ।
" " योगाऽध्यायः ।
" " करणाऽध्यायः ।
" " मुहूर्ताऽध्यायः ।
" " उपग्रहाऽध्यायः ।
" " संक्रमणाऽध्यायः ।
" " चन्द्रताराबलाऽध्यायः ।
" " लग्नाऽध्यायः ।
" " प्रथमार्तवाऽध्यायः ।
" " पुंसवनसीमन्ताऽध्यायः ।
" " जातकर्माऽध्यायः ।
" " अन्नाशनाऽध्यायः ।
" " चौलाऽध्यायः ।
" " उपनयनाऽध्यायः ।
" " विवाहप्रश्नलक्षणम् ।
" " कन्यावाग्दानविधानम् ।
" " विवाहाऽध्यायः ।
" " श्राद्धाऽध्यायः ।
" " छुरिकाबन्धाऽध्यायः ।
" " यात्राऽध्यायः ।
" " वास्तुपूजाऽध्यायः ।
" " राज्याभिषेकाऽध्यायः ।
" " प्रतिष्ठाऽध्यायः ।
" " नवाम्बरलक्षणाऽध्यायः ।
" " अग्न्याधानाऽध्यायः ।
" " सद्योवृष्टिलक्षणऽध्यायः।

CC-0. Nepal Sanskrit Academy, Kathmandu

" " काकसंयोगोत्पातशान्तिः
" " उत्पातशान्तिकाऽध्यायः।
" " शिथिलीजननशोषशान्ति।
" " शरीरोपशान्तिकाऽध्यायः।
" " इत्युल्कालक्षणाऽध्यायः।
" " परिवेषलक्षणम् ।
" " इन्द्रचापलक्षणम् ।
" " प्रतिसूर्यलक्षणम् ।
" " दिग्दाहलक्षणम् ।
" " रजोलक्षणम् ।

इति श्रीकश्यपब्रह्मर्षिविरचितायां संहितायां मिश्रकाऽध्यायः समाप्तोऽयंसंहिता ।

शिबाननतदीक्षणज्वलनजिह्विकेज्यामिते
शके नभसि मेचके शिव शिरोवतंसान्विते ।
शिखिध्वजतिथाविमां विधिजकश्यपेनोदितां
विलिख्य किल संहितां धृतवतां ममेशोर्चितः ॥

केरलप्रश्नः

क्रमाङ्कः ५९८२ विषयाङ्कः ३६

ग्रन्थकारः ....। मध्यदेशीयं कागतम् देवनागरी लिपिः । पङ्क्तयः ७ । आकारः ७×३½ । ग्रन्थसंख्या १६८ । पत्रसंख्या १६ । पूर्णः ।

आदिवाक्यम्—

श्रीगणेशायनमः

नमो भगवती कूष्माण्डिनी सर्वकार्यप्रणाशिनी सर्वनिमित्तप्रकाशिनी एह्येहि त्वर २ वरदे २ हिली २ मातंगिनी सत्यंब्रूहि २ स्वाहा

महावीरं नमस्कृत्य केरलं ज्ञानभास्करम् ।
वक्ष्ये सद्गुरुणा श्रेष्ठं ज्ञेयं येन शुभाशुभम् ॥
पदं पदं पदं १११ चैव पतिता शोभनस्तव ।
शुभं च दृश्यते तत्र सर्वारंभेषु, चिन्तितम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

अन्तिमंवाक्यम् ··

प्रोषितागमनं पुत्रलाभस्थानं तथैव च ।
नष्टस्यार्थस्य सर्वस्य क्षिप्रं लाभो भविष्यति॥

इतिश्रीकेरलाख्यं प्रश्नं समाप्तम् ।
संवत् १८६२ अलेखीदं पुस्तकं श्रीदीक्षितदेवीदीनेन लक्ष्मणपूर्यां चैत्राष्टाम्यां गुरौ

केरलप्रश्नः

क्रमाङ्कः ३६८३ विषयाङ्कः ४०

ग्रन्थारः ···· ·· ·· । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयोऽनियताः । आकारः ६×३½ । ग्रन्थसंख्या १८७ । पत्र संख्या ११ ।

अन्तिमंवाक्यम् –

श्रीगणेशायनमः

साक्षात्त्रैलोक्यबोधाय प्रश्नं केरलभाषितम् ।
त्रिकालविषयं प्रोक्तं तस्मै केरलये नमः ॥

ज्ञानदीपकमासाद्य वृत्तिं कृत्वा सदक्षरैः ।
स्वरस्नेहेनसंयोज्य ज्वलये दुस्तरैन्धनैः ॥

यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः प्राप्तिम् ।
व्यञ्जयति शास्त्रमेतत्तमसि द्रव्याणि दीप इव ॥

अन्तिमं वाक्यम –

पिण्डस्य द्वादशभागः । एकेन मेषः । द्वाभ्यां वृषः । त्रिभिर्मिथुनम् । चतुर्भिः कर्कटः । पञ्चभिः सिंहः । षड्भिः कन्या । सप्तभिस्तुला अष्टभिर्वृश्चिकः । नवमिर्धनुः । दशभिर्मकरः । एकादशभिः कुम्भः । द्वादशभिर्मीनः ।
इति केरलप्रश्नः संपूर्णः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

केरलसारः

क्रमांक : ७४०५

विषयांक: ४१

ग्रन्थकारः - पराशरः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयो ऽनियताः । ६½×४ ग्रन्थसंख्या……… । पत्रसंख्या ६ ।

आदिवाक्यम्—

आदित्यप्रमुखा खेटास्तथा मेषादिरायः ।
लोकस्यैवोपकारार्थं पान्तुमामिह सर्वदा ॥

पराशरमुनिं नत्वा तद्धोरां च निरीक्ष्यर्थ्च ।
वक्ष्येऽप्युडुदशामार्गं पूर्वशास्त्रानुसारतः ॥

पुष्पिका—

इति पराशरीये केरलसारे कारकप्ररणम् ।

केरससूत्रम

क्रमाङ्कः ४५५५

विषयाङ्कः ४२

ग्रन्थकारः- मरिचिः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः १६ । आकारः १०×४½ । ग्रन्थसंख्या ३१ पत्रसंख्या १ । पूर्णम् ।

आदिवाक्यम्—

अथात्र मरिचिनोक्तं केरलसूत्रं वर्णात्मकमभिव्यक्तं प्रसरति-१ द्वेविधे २ द्वेष्टा ३ युग्मानुसंधिभिः ४ युग्मात्मसंशयानुभवः ५ युगलं प्रतिसंज्ञापितरे के ६ ।

पुष्पिका—

इति केरलसूत्रे चतुर्थाऽध्यायः पूर्णः पूर्णमिदं मरीच्युक्तं केरलसूत्रम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

केरलीयं नित्यदशाफलम्

क्रमाङ्कः ४०३५

विषयाङ्कः ४३

ग्रन्थकारः ... ... । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ११ । आकारः १०×५½ । ग्रन्थसंख्या ५० । पूर्णम् ।

आदिवाक्यम्—

श्रीगणेशाय नमः । केरलीयनित्यदशाफलम् ।

जन्मनक्षत्रमारभ्य नित्यनक्षत्र गण्यते
नेत्रघ्नंनित्यताराादि जन्मऋक्षान्तसंयुते ॥
नवमिश्च हरेद्भागं शेषं नित्य दशाफलम् ।

पुष्पिकावाक्यम्—

इति केरलीयभार्गवजातके नित्यदशाफलकथनम् ।
संवत् १९०९ शाके १७७४ वैशाखवदी १४ रविवासरे ॥ श्रीरस्तु ॥

केरलीयप्रश्नम्

क्रमाङ्कः ७०७४

विषयङ्कः ४४

ग्रन्थकारः ... ... । नेपालीयं कागतम् । देवनागरी लिपिः पङ्क्तयोऽनियताः । आकारः ८½×४ । ग्रन्थसंख्या ४० । पत्रसंख्या ३ पूर्णम् ।

श्रीसरस्वत्यै नमः

ॐ ह्रीं श्रीँ वाग्वादिनि स्वाहा । ऐँ ह्रीँ वद वद वाग्वादिनी स्वाहा । ॐ सिद्धिं श्रृङ्गं इति मंत्रेण पुगीफलमभिमंत्र्य पृच्छकहस्ते दत्वा पश्चादिति वदेत् ।

अन्तिमवाक्यम्—

निगदितमृषिवाक्यात्सारमेतद्रहस्यं
सकलशकुनसारं ज्ञानसारं विवेकम् ।
फलधरसहितो यः पृच्छति निर्विकल्पं

CC-0. Nepal Sanskrit Academy, Kathmandu

भवति सकलसत्यं नान्यथा नेतिसत्यम्

इति श्रीकेरलीयः प्रश्नः समाप्तः। शुभमस्तु।

केशवीयजातकपद्धतिः

सभाष्यं सोदाहरणं च

क्रमाङ्कः ६५३६ विषयाङ्कः ४५

ग्रन्थकारः केशवदैवज्ञः। भा. धर्मेश्वरः। मध्यदेशीयं कागजम्। देवनागरी लिपिः। पङ्क्तयः१३ १४। आकारः ६½ ४½। ग्रन्थसंख्या१६२०। पत्रसंख्या ७२।

आदिवाक्यम्—

श्री गणेशायनमः

नत्वा विघ्नपशारदाच्युतशिवब्रह्मार्कमुख्यान् ग्रहान्
कुर्वे जातकपद्धतिं स्फुटतरां ज्योतिर्विदां प्रीतये
यन्त्रैः स्पष्टतरो ऽत्र जन्म समयो वेद्योऽत्र खेटाः स्फुटा
यत्पक्षेऽन्हि घटंत उद्गम इहास्तर्क्षं सषङ्गः स च॥

टीकायाम्—

स्फुर्जद्भानुसहस्रमालिनिघनध्वान्तेभकण्ठीरवे
यत्र त्रातुमिदं जगत्समुदिते दिव्यन्ति देवा दिवि।
यज्ञादिप्रभवः प्रभुः प्रणमतां प्रीतिं प्रतीतिप्रदः
सोऽयं नो विदधातु विम्बितफलं त्रैलोक्यदीपो रविः॥

श्रीरामस्य पदारविन्दयुगलं सद्बुद्धिवृद्धिप्रदं
नत्वा केशव पद्धतेः फुटतरां व्याख्यां मुदे तद्विदाम्।
श्रीमद्भारतसाहिजन्मसमयस्यांगीकृतो देशकः
प्राप्तज्ञानलवः करोति सुगमोपायेन धर्मेश्वरः॥

अथात्र केशवाचार्यः स्वाभिमतदेवतानमस्काररूपं मङ्गलमाचरन् विषयसंबन्धाधिकाररूपं संबन्धचतुष्टयं दर्शयन् शार्दूलविक्रिडितपद्यार्द्धेन प्रतिजानीते।

CC-0. Nepal Sanskrit Academy, Kathmandu

नत्वेति— अस्यार्थः — विघ्नपः- श्रीगणेश शारदा श्रीसरस्वती, अच्युतो नारायणः, शिवो महादेवः। ब्रह्मा चतुराननः अथवा ब्रम्हेति व्यापकं सच्चिदानंदात्मकं परंब्रह्म अर्कमुख्यग्रहा मार्तण्डादयो गगनगा एतान् नत्वा ज्योतिरिति ग्रहनक्षत्रादिहेतुकफलज्ञानप्रकाशकं शास्त्रं इत्युच्यते। तद्यथा—

ज्योतिः शास्त्रमनेकभेदबहुलं स्कन्धत्रयाधिष्ठितं
तत्राद्यो गणिताभिधः पृथुतरः स्कन्धोऽपरः संहिता।
यः पृथ्वीचलनाद्भुतादिकफलं ज्ञानैकहेतुस्तथा
तार्तीयः समयस्त्रयोद्भवफलो ज्ञानैकहोराभिध इति ॥

एतद्विदन्ति ज्योतिर्विद स्तेषां प्रीतये सुखार्थं यद्यपि तत्प्रयोजकत्वात्, होराविदी प्रीतय इति वक्तुमुचितं तथापी गणितस्कन्धविदां गणित-लाघवदर्शनेन प्रीतिः। होरा विदां प्रीतिर्युक्तैव तदंगत्वादेतद्दशान्तर्दशा-शुभाशुभ फलज्ञानमन्तरेण न यात्रायुद्धादिमुहूर्त शक्तिरिति।

तदुक्तं श्रीपतिना—

यात्राभिधाने कथयाम्यशेषं सर्वैरुपेतस्य गुणैर्जिगीषोः।
अतर्किते जन्मनि तस्य याते फलाप्तिरुक्ता गुणवर्णतुल्या ॥

अतः संहिताविदामप्यत्र प्रीतिरिति भावः। स्फुटतरां प्रकटार्थां जातकपद्धतिं जातस्येदं जातमेव जातकं तस्येद मित्यणिकृते स्वार्थेक-प्रत्ययः जातस्य वालकस्य पूर्वजन्मार्जितं सदसत्कर्मजन्य-श्रु ता-श्रुता-दृष्टफलबोधकं शास्त्रं जातकं तस्य पद्धतिं मार्गं तदुक्तगणितस्य क्रमेण निरूपणमित्यर्थः। अहं कुर्वे वर्तमानसामिप्येवर्तमानवद्वेति लट्प्रत्ययः।

पुष्पिकावाक्यानि —

इतिश्रीदैवज्ञरामचन्द्रात्मजधर्मेश्वरविरचितायांकेशवपद्धतिसोदाहरण टीकायां दृष्टिगणिताध्यायः।
” ” दशाविचाराऽध्यायः।

संवत् नगरसाद्रिभू १७६७ समये ज्येष्ठशुद्धषष्ठ्यां भौमवासरे

CC-0. Nepal Sanskrit Academy, Kathmandu

केशवीयजातकपद्धत्युदाहरणम्

क्रमाङ्कः ६५३८ विषयाङ्कः ४६

ग्रन्थकारः- विश्वनाथः। मध्यदेशीयं कागतम्। देवनागरी लिपिः पङ्क्तयोऽनियताः। आकारः ११×३½। ग्रन्थसंख्या ६७२। पत्रसंख्या२६। पूर्णम्।

आदिवाक्यम्—

श्रीगणेशायनमः

श्रीगणेशं नमस्कृत्य केशवीनामपद्धतेः।
गणितं विश्वनाथेन क्रियते बालबुद्धये॥

नत्वेति — अहं केशवः जातक पद्धतिं कुर्वे जातस्येदं जातकं जातस्य बालकस्य जन्मान्तरार्जित सदसत्कर्मजनितं शुभाशुभफलनिरूपकं शास्त्रं जातकमित्युच्यते। जातकशास्त्रे यानि कर्माणि गणितक्रिया स्तेषां पद्धतिं मार्गं कुर्वे। किं कृत्वा विघ्नपशारदाच्युत शिवब्रम्हार्कमुख्यग्रहान् नत्वा विघ्नपः श्रीमहागणपतिः श्रीसरस्वतीत्यादि सूर्यादयो नवग्रहाः एतान्नत्वा जातकपद्धतिं कुर्वे, कथं भूतां पद्धतिं स्फुटतरां प्रस्फुटार्थां कस्मै ज्योतिर्विदां प्रीतये ज्योतिंषि ग्रहनक्षत्रादीनि विदते ज्योतिर्विदस्तेषां प्रीतये। अत्र जन्मसमयस्पष्टतरः सूक्ष्मोवेद्यो ज्ञातव्यः। कैर्यन्त्रैः घटीशङ्कुचक्रफलकादिभिः। अत्र जन्मसमये स्फुटाः खेटाः वेद्याः। ते खेटा यत्पक्षेण घटन्ते तथा सुगणकेन वेद्याः श्रीमत्केशव दैवज्ञैर्विद्यमानघटनामवलोक्य सा साधिता स्ते गणेशज्योतिविद्भिर्ग्रह लाघवे निबद्धाः।

तद्यथा—

सौरोर्कोऽपिविधूच्चमंक कलिको नाऽज्जो गुरुस्त्वार्यजो
ऽसृग्राह्व च कुजज्ञकेन्द्रकमथार्येशेषु भागः शनिः।
शौक्रं केन्द्रमजार्यमध्यगमिति यो यान्ति दृक्तुल्यतां
सिद्धैस्तैरिह पर्वधर्मनयसत्कार्यादिकं त्वादिशेत्॥

CC-0. Nepal Sanskrit Academy, Kathmandu

इह जन्मसमये उद्गमं लग्नं साध्यं सोदयैः स उद्गमः स षड्भः षड्राशियुक्तोऽस्तर्क्षं सप्तम भावो भवति ।

पुष्पिका वाक्यानि—

इतिविश्वनाथदैवज्ञविरचिते केशव्युदाहरणे दृष्टिसाधनाऽध्यायः ।
" " बलसाधनाऽध्यायः ।
" " शुभाशुभबलसाधनाऽध्यायः ।
" " अन्तर्दशाऽध्यायोदाहरणम् ।

शाके १७०५ मासे ८ पक्षे २ तिथौ ३० वारे २ नक्षत्रे १७ पद्मनाभोपाध्यायेन लिखितमिदं पुस्तकं स्वपठनार्थं पुत्रादिपाठनार्थं शुभम् ।

केशवीयजातक पद्धत्युदाहरणम्

क्रमाङ्कः ६५३५ विषयाङ्कः ४७

टीकाकारः विश्वनाथः । मध्यदेशीयं कागतम् देवनागरी लिपिः । पङ्क्तयः ७ । आकारः ११$\frac{1}{2}$×३$\frac{1}{2}$ । ग्रन्थसंख्या ६१४ । पत्रसंख्या ४० । अपूर्णम् ।

केशवीयजातक पद्धत्युदाहरणम्

टीकाकारः—विश्वनाथः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः १२ । आकारः ११×४ । ग्रन्थसंख्या ७२५ । पत्रसंख्या ४६ । जीर्णा शीर्णा च ।

केशवीयवर्षफल पद्धतिः

क्रमाङ्कः ७४२९ विषयाङ्कः ४८

ग्रन्थकारः —केशवदैवज्ञः । मध्यदेशीयं कागतम् । देवनागरी लिपिः पङ्क्तयः ८ । आकारः ६×४ । ग्रन्थसंख्या ६४ । पत्रसंख्या४ । अपूर्णः । जीर्णः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

केशवीयवर्षफल पद्धतिः

क्रमाङ्कः ७३६८ विषयांकः ४६

ग्रन्थकारः- केशवदैवज्ञः। मध्यदेशीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः ८। आकारः ६×४ ग्रन्थसंख्या ६४। पत्रसंख्या ६।

आदिवाक्यम्—

श्रीगणेशाय नमः

यत स्ताजिकोक्तं फलं हायनोक्तं क्रमान्नोक्तमन्यै र्यतो दुर्गमं तत्।
क्रमाद्वच्मि तत्पद्धतिं प्रस्फुटोक्त्या गणेशंनमस्कृत्य बालावबोधाम्॥

पुष्पिकावाक्यनि—

इति केशवपद्धतौ वर्षादिग्रहसाधनम्।
,, द्वादशवर्गिकाः।
,, हद्दांशकाः।
,, केशवीयवर्षफलपद्धतिः समाप्तः।

केशवीयवर्षफलपद्धत्युदाहरणम्

क्रमाङ्कः ७३६६ विषयाङ्कः ५०

टिकाकारः- विश्वनाथदैवज्ञः। मध्यदेशीयं कागतम्। देवनागरी लिपिः। पङ्क्तयोऽनियताः। आकारः १०×४½। ग्रन्थसंख्या ११२५। पत्रसंख्या-६२। आदिखण्डितम्।

केशवीयवर्षफलपद्धत्युदाहरणम्

क्रमाङ्कः ७३६८ विषयाङ्कः ५१।

टिकाकारः- विश्वनाथदैवज्ञः। नेपालीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः ७। आकारः १०×३½। ग्रन्थसंख्या ५००। पत्रसंख्या ३६। आदिखण्डितम्।

CC-0. Nepal Sanskrit Academy, Kathmandu

केशवीयपद्धत्युदाहरणम्

(नेवारीभाषात्मकम्)

क्रमाङ्कः ६५३६ विषयाङ्कः ५२

भाषाकारः ……… । । नेपालीयं कातगम् । नेवारी लिपिः पङ्क्तयः ७ । आकारः १०×३$\frac{1}{2}$ । ग्रन्थसंख्या५७० । पत्रसंख्या ३६ । आदिखण्डितम् ।

आदिवाक्यम्—

श्रीगणेशायनमः

श्रीकेशव दैवज्ञेन जातकपद्धति दयका च्छुयाङा व दयका । नमस्कारयाङा व सूनमस्कार धालसा श्रीगणेश, श्री शारदा, श्रीअच्युत, श्रीशिव श्रीब्रह्मा, श्रीसूर्य्यादि नवग्रह, थवपनि नमस्कारयाङाव दयका ।

पुष्पिका—

इति केशवीयपद्धत्युदाहरणनेपालभाषा समाप्ता ।

केशवीयवर्षफलपद्धतिटीका

क्रमाङ्कः ७४२७ विषयाङ्कः ५३

टीकाकारः-विश्वनाथदैवज्ञः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ११ । आकारः ११$\frac{1}{4}$×३$\frac{1}{4}$ । ग्रन्थसंख्या… … पत्रसंख्या ३७५ ।मूषकदष्टम् ।

आदिवाक्यम्-

स्वस्ति श्रीगणेशाय नमः

तुन्दिलमिन्दुकलाधरमर्धवीकृत विघ्नसं…
… … … कामं कामरिपोरर्भकं भजतः ।
दिवाकराद्द्वविदां वरिष्ठायो विश्वनाथो… …
… … —शवस्याब्द फलस्य टीकां करोति सोदाहरणं प्रसन्नम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

श्रीमत्केशव दैवज्ञ — — — — — र्थं तत्प्रचार्थं च गणेशं नमस्कृत्य चिकीर्षितं प्रतिजानीते। यत इति। अह — — — — स्य वर्षाफलस्य पद्धतिं मार्गं क्रमादनुक्रमेण वच्मि कथयामि। किं कृत्वा गणेशं नमस्कृत्य यतः अन्यैराचार्यैं स्ताजिकोक्तं ताजिक शास्त्रोक्तं हायनोत्थं वर्षजातं फलं क्रमान्नोक्तं कुतः यतो दुर्गमं सुगमरीत्या ज्ञातमशाक्यं। अतः अहं वक्ष्ये कृया प्रस्फुटोक्त्या प्रकटोक्त्या॥

पुष्पिका —

इतिश्रीगणकचक्रचूडामणिश्रीदिवाकरदैवज्ञात्मजश्रीविश्वनाथदैवज्ञविरचिता श्रीकेशवदैवज्ञकृता वर्षफलपद्धतिटीका समाप्ता।

कौशल्यकुसुमावली

(रुद्रकौशलं वा)

क्रमाङ्कः—४५४८ विषयाङ्कः ५४

ग्रन्थकारः राजाग्रहवर्द्धनः। नेपालीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः ११। आकारः १३×५। ग्रन्थसंख्या १३८४। पत्रसंख्या ३३। अपूर्णा।

आदिवाक्यम्…

ॐनमोगणपतये

सिन्दूरपूरकुम्भस्थलरविध्वस्तविघ्नघनतिमिरम्।
गगननिभं गजवदनं नमामि सत्वार्थसिद्धये शुद्धम्॥

शुभाशुभपरिज्ञानं विना लोकोऽवसीदति।
अवसन्ने कुतस्तस्मिन्धर्मकामार्थसिद्धये॥

यतो हि पुरुषार्थसम्पत्तिस्तच्छुभम्। अशुभं पुनरेतद्विपरीतफलम्। तच्च नैसर्गिकानुषङ्गिकभेदेन प्रत्येकं द्विविधम्। पूर्वजन्मकर्मानुस्यूतग्रहदशापाकादिकं निसर्गजम्। कर्मानुष्ठानक्षणविशेषविपाकश्चानुषङ्गि-

CC-0. Nepal Sanskrit Academy, Kathmandu

कम् । हिताहितप्राप्ति परिहारहेतुपरिज्ञानम् । तच्च सद्गुरूपदेशविमललोचनावलोकनावलोकितानेकशास्त्रविदांसंदेहः सम्पद्यते । शास्त्रमनेकप्रसरं भिन्नस्थितिविरलंहिनसञ्चारम् । तदवगतिविरहविकलो लोको नोपैति चातुर्यम् । अत एव वरगुरुचरणारविन्द द्वन्द्व वन्दनामन्दानन्दोद्य मणिसंबोधिसहजावबोधराज राजीव सौजन्यरजोराजिविराजमानो राजब्रह्मवर्द्धनोऽवधीरितविषय विज्ञाननयोऽपि । वैदग्ध्यविलासाभिलाषिशिष्यसार्थनानुबन्ध परोपकारैकरसिकतया श्रीमद्‌ब्रह्मयामलकौशलायतननरपतिजयचर्यावराहहोराशाकुनादिशास्त्राणामात्ममतिभाजनानुसारं सारसमुच्चयं कौशल्यकुसुमावली नाम निगद्य पद्य गद्य हृद्य संदर्भं विधास्ये ।

विबुधमतबुधजनोक्तज्योतिषविपिनेष्टसुमनसांसर्गयम
चम्पूसूत्रग्रथिता शिक्षोपयोगाय भवतु भुवि भाविनाम् ॥
प्रथमोऽत्रविचित्रांशो द्वितीयस्तु क्रियाश्रयः ।
तृतीयो जातकांशस्यातुरीयः शाकुनाभिधः॥
यद्यपि कलिमलकलिलचपलहृदयः सांप्रकिको लोकः ।
शरीर स्वरोदय विशेषावधारणे प्रायशो नाशक्तो नशक्तश्च भवति॥

तथापि सकलशुभाशुभनिमित्त मौलिभूतत्वात्पुरुषार्थसार्थसाधनोपयोगित्वाच्च तस्य निदर्शनं किञ्चिदुपन्यस्यते ॥

पुष्पिकावाक्यानि-

इतिकौशल्यकुसुमावल्यां शारीरस्वरोदयो नाम प्रथमा ग्रथना ॥
,, वर्णस्वरावचयो नाम द्वितीयग्रथना ॥
,, विचित्रानाम प्रथमोंशः समाप्तः ।

अन्तवाक्यम्-

लग्नं यदा नास्ति विशुद्धमन्यद्गोधूलिकां साधु तदा दिशन्ति ।
लग्ने विशुद्धे सति वीर्ययुक्ते गोधूलिकानेव फलं विधत्ते ॥
इति गोधूलिगुणाः ।
अतः परं निबोधेमं शचीयागविधिं शुभम् ।
प्रशस्ततिथिनक्षत्रक्षणवारेषु शिल्पिना ।
कुम्भकार मृदा - · · - कारयित्वा पुलोमजा ॥

अतः परंखण्डितम्॥

CC-0. Nepal Sanskrit Academy, Kathmandu

क्रान्तिपातार्यात्रयनिरूपणम्

क्रमाङ्कः २६३३ बिषयाङ्कः ५५

ग्रन्थकारः— मुनीश्वरः। मध्यदेशीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः ११। आकारः $१०\frac{१}{२} \times ४\frac{१}{२}$ ग्रन्थसंख्या ४०० पत्रसंख्या २०। पूर्णम्।

आदिवाक्यम्—

गणेशं भारतीं नत्वा राम्रं नारायणं गुरुम्।
भास्करोक्तं क्रान्तिपातार्यात्रयं विवृणोम्यतः॥
अथोपोद्घातसंगत्या क्रान्तिपातस्वरूपमुपजातिकयाह।
विषुवत्क्रान्तिवलयोः संपातः क्रान्तिपात स्यात्।
तद्भगणाः सौरोक्ताः व्यस्ताः अयुतत्रयं कल्पे। इति॥

विषुवत्क्रान्तिवृत्तयोः पूर्वोक्तयोर्यः प्रागुक्तः संपात स्तद्वृत्तसंयोगाश्रितभगोलप्रदेशविशेषः॥

पुष्पिकावाक्यम् —

इतिश्रीसकलगणकसार्वभौमरंगनाथात्मजमुनीश्वरापरनामवि—श्वरूपगणकविरचितं क्रान्तिपातार्यात्रयनिरूपणमेकनाथमुखमञ्जनं समाप्तम्॥

क्षयमासनिर्णयः

क्रमाङ्कः ६३१३ विषयाङ्कः ५६

ग्रन्थकारः- देवराजः। नेपालीयं कागतम्। देवनागरी लिपिः। पङ्क्तयोऽनियताः। आकारः ६×४। ग्रन्थसंख्या ४५। पत्रसंख्या ३।

आदिवाक्यम्--

श्रीगुरुगणेशाभ्यांनमः

हिरण्यगर्भं जगदीशितारं मृणमण्डलं सामकरं वरेण्यम्।
यजुः स्वरूपं परमात्मतत्वं नमाम्यहं गर्भमनन्तमर्कम्॥

CC-0. Nepal Sanskrit Academy, Kathmandu

मलाश्चैत्रमासादि सप्तैव भट्टैः प्रणीताश्च तेषामभिप्रायमाह।
त्रिभोनाढ्या मंदोच्च तुल्यर्क्षमध्ये रवेर्यज्वमासाश्च सामान्यतस्ते ॥

पुष्पिकावाक्यानि —

इति श्रीदैवज्ञराजकृतः क्षयमासनिर्णयः समाप्तः ।

खण्डखाद्यकंकरणम्

क्रमाङ्कः २६३५ विषयाङ्कः ५८

ग्रन्थकारः — ब्रह्मगुप्तः । मध्यदेशीयं कागतम् । देवनागरी लिपिः ।
पङ्क्तयोऽनियताः । आकारः १० × ४½ ग्रन्थसंख्या ३०० पत्रसंख्या १८
ताराविक्षेपाधिकार पर्यन्तम् ।

आदिवाक्यम्--

सिद्धिः । श्री महागणपतये नमः । श्रीसूर्याय नमः ।
प्रणिपत्य महादेवं जगदुपत्तिस्थितिप्रलय हेतुम् ।
वक्ष्यामि खण्डखाद्यकमाचार्यार्यभटतुल्यफलम् ॥
प्रायेणार्यभटेन व्यवहारः प्रतिदिनं यतो शक्यः ।
उद्वाह जातकादिषु तत्समफल लघुतरोबितरतः ।
श्री विक्रमादित्यराज्यस्य पञ्चत्रिंशोत्तरं शतम् ॥
पातयित्वा भवेच्छाकश्चैत्र शुक्लादिति क्रमात् ॥
शाकोऽगवसुशरोनोऽ ५८७ र्क १२ गुणश्चै त्रादि मास संयुतः ।
त्रिंशद्गुणस्तिथियुतः पृथगिषु सहितो द्विधा भक्तः ।
पञ्चोदधिनवमनुभिर्लब्धोनो भाजितः षडगनंदैः ।
लब्धाधिमासकदिनैरधिकोऽधो रुद्रसंगुणितः ॥

पुष्पिकावाक्यानि—

इति श्रीखण्डखाद्यके ब्रह्मगुप्ताचार्यविरचिते तिथिनक्षत्राधिकार प्रथमः ।
,, ग्रहस्फुटाधिकारो द्वितीयः ।
,, त्रिप्रश्नाधिकारस्तृतीयः ।
,, चन्द्रग्रहणाधिकारश्चतुर्थः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

" आदित्यग्रहणाधिकारः पञ्चमः ।
" उदयास्ताधिकारः षष्ठः ।
" शृङ्गोनत्यधिकारः सप्तमः ।
" समागमाधिकारोऽष्टमः ।
" ताराविक्षेपाधिकारो नवमः ।

॥ शुभम् ॥

खण्डखाद्यकंकरणम्

क्रमाङ्कः ६८८२ विषयाङ्कः ५८

ग्रन्थकारः- ब्रह्मगुप्तः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयोऽनियताः । आकारः ६×४ । ग्रन्थसंख्या ३३० । पत्रसंख्या - १६ । व्यतिपात वैधृतिपातानयनाधिकार पर्यन्तम् ।

सिद्धपर्वतधरा मितशाके घाणमाससित पक्षके शुभे ।
खण्डखाद्य परिपूर्ति कारितं तेन तुष्यतु सदा शिवशम्भुः ।

॥ शुभम् ॥

खेटसिद्धिः

क्रमाङ्कः २६८४ विषयाङ्कः ५६

ग्रन्थकारः । मध्यदेशीयं कागतम् देवनागरी लिपिः पङ्क्तयोऽनियताः । आकारः ६½×३½ । ग्रन्थसंख्या । पत्रसंख्या ७ पूर्णः ।

आदिवाक्यम्-

श्रीगुरुगणेशाभ्यान्नमः

अत्र प्रथमतो मेषाऽर्कसाधनं तत्र काश्यां देशान्तरपलानि ४७ सैकः ।

समासोयं खेटसिद्धिः लघु० ।

CC-0. Nepal Sanskrit Academy, Kathmandu

गणकमण्डनम

क्रमाङ्कः ६४४ विषयाङ्कः ६०

ग्रन्थकारः- नन्दिकेश्वरः। मध्यदेशीयं कागतम्। देवनागरी लिपिः पङ्क्तयः ६ । आकारः १०×४ । ग्रन्थसंख्या ६५२ । पत्रसंख्या ३० । पूर्णम् ।

आदिवाक्यम्—

नत्वा दुर्गां गणेशं च श्रीमद्वेदाङ्गराजजः ।
नन्दिकेश्वरसञ्ज्ञोऽहं वक्ष्ये गणकमण्डनम् ॥
अश्विनी भरणी चैव कृत्तिका रोहिणी मृगः ।
आर्द्रा पुनर्वसू पुष्योऽश्लेषा चैव मघा तथा ॥
पूर्वाफोत्तरफाहस्त श्चित्रा स्वाती विशाखिका ।
राधा ज्येष्ठा च मूलर्क्षं पूर्वाषाढोत्तरा तथा ॥
अभिजिच्छ्रवणश्चैव धनिष्ठाशिततारका ।
पूर्वाभाद्रोत्तराभाद्रे चान्तिमंभे तु रेवती ॥

पुष्पिकावाक्यानि—

इति वेदाङ्गराजात्मज नन्दिकेश्वरविरचिते गणकमण्डने नक्षत्रसंज्ञादि-प्रथमोऽध्यायः ।

„ योगसंज्ञादिद्वितीयोऽध्यायः
„ नक्षत्रवारादिकृत्यस्तृतीयोऽध्यायः ।
„ दिनरात्रिक्षणयात्रा प्रकरणं चतुर्थोऽध्यायः
„ मौञ्जिबन्धनमोक्षान्तः पञ्चमोऽध्यायः ।
„ विवाह मेलकादि वधूप्रवेशान्तः षष्ठोऽध्यायः ।
„ गृहाद्यारंभ समाप्त्यन्तः सप्तमोऽध्यायः ।
„ गणितादिक्रियानामाष्टमोऽध्यायः ।

शुभमस्तु ।

CC-0. Nepal Sanskrit Academy, Kathmandu

गणकमण्डनम्

क्रमाङ्कः ६४१ विषयांकः ६१

ग्रन्थकारः- नन्दिकेश्वरः। नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः १० । आकारः ८×४ ग्रन्थसंख्या ५५० । पत्रसंख्या ३१ । अन्त्यखण्डितम् ।

गणकमण्डनम्

क्रमाङ्कः ६३५ विषयाङ्कः ६२

ग्रन्थकारः- नन्दिकेश्वरः । । नेपालीयं कागतम् । देवनागरी लिपिः पङ्क्तयः १० । आकारः ८$\frac{1}{2}$×३$\frac{1}{2}$ । ग्रन्थसंख्या ४४० । पत्रसंख्या २३। मध्यान्तौखण्डितौ ।

गणकमण्डनम्

क्रमाङ्कः ६५१ विषयाङ्कः ६३

ग्रन्थकारः नन्दिकेश्वरः । नेपालीयं कागतम् । देवनागरी लिपिः पङ्क्तयः ११ । आकारः ६×५$\frac{1}{2}$ । ग्रन्थसंख्या ६५२ । पत्रसंख्या २६ । पूर्णम् । संवत् १८८७ मिति पौषशुदी १५ लिखितं कुलप्रसादेन। शुभं समाप्तम् ॥

गणितनाममाला

क्रमाङ्कः ६३१६ विषयाङ्कः ६४

ग्रन्थकारः— हरिदत्तः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः १० । आकारः ६$\frac{1}{2}$×४ । ग्रन्थसंख्या १५०। पत्रसंख्या ७। पूर्णा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

आदिवाक्यम्—

श्रीद्वारकाधीशं भजे

गणितस्य नाम मालां वक्ष्ये गुरुः प्रसादत; ।
बालानां हि सुबोधाय हरिदत्तो द्विजाग्रणीः ॥ १ ॥
अश्विनं दस्रभं दस्रं नासत्यं तुरगं हयम् ।
भरणी यमभं याम्यं प्रोक्तमन्तक मंतिकम् ॥ २ ॥
कृत्तिकाग्निभमाग्नेयं कृशानुं हव्यवाहनम् ।
अनलं दहनर्क्ष्यं च वह्निभं च हुताशनम् ॥३ ॥

पुष्पिका वाक्यानि—

इति नक्षत्रनाम संज्ञा ।
" द्वादश भाघ संज्ञा ।
" केन्द्रत्रिकोणपणफरापोक्लिमसंज्ञा ।
" चन्द्रनामानि ।
" भौमनामानि ।
" बुधनामानि ।
" गुरुनामानि ।
" शुक्रनामानि ।
" शनिनामानि ।
" राहुकेत्वोर्नामानि ।
" ग्रहनामानि ।
" मासनामानि ।
" चतुर्विधमानसामानि ।
" घटिपलप्रहरसंज्ञा ।
" दिनसंज्ञा रात्रीसंज्ञा च ।
" पूर्वाह्णसंज्ञा पराह्णसंज्ञा च ।
" पक्षसंज्ञा ।
" ऋत्वयनवर्षसंज्ञा च ।
" राश्यंशकलासंज्ञा ।
" दिङ्नामानि ।
" चरस्थिरद्विस्वभावसंज्ञा ।
" दक्षिणायणोत्तरायणसंज्ञा ।
" उत्तरदक्षिणगोलसंज्ञा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

इति संक्रान्तिसंज्ञा ।
" ऋतुसंज्ञा ।
" चतुष्पद्जलकीटसरीसृपसंज्ञा ।
" गदनवप्रकारसंज्ञा ।
" रविगृहसंज्ञा ।
" सूर्यादीनां नीचोच्चसंज्ञा ।
" सूर्यादीनां मूलत्रिकोणसंज्ञा ।
" गणितनाममाला समाप्ता ॥

संवत् १८५७ शाके १७१२

गणितमञ्जरी

क्रमाङ्कः-७४७६

विषयाङ्कः ६५

ग्रन्थकारः रणजितमल्लदेवः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयोऽनियताः । आकारः १०×४½ । ग्रन्थसंख्या । पत्रसंख्या १८ । अपूर्णा ।

अन्तिमंवाक्यम्...

महाराजाधिराजेन भूपतीन्द्रस्य सूनुना ।
रणजिन्मल्लदेवेन कृता गणित मञ्जरी ॥
इति श्रीमन्महाराजाधिराज वन्दितचरणकमल सुखासनविराजमान दिनकरान्वयनेपालमण्डलमण्डलेश्वरश्रीश्रीमज्जयभूपतीन्द्रमल्लदेवात्मज-श्रीश्रीमज्जयरणजिन्मल्लदेवकृता गणित मञ्जरी समाप्ता ॥

गणितमञ्जरी

क्रमाङ्कः २६७७

विषयाङ्कः ६६

ग्रन्थकारः- जयरणजिन्मल्लदेवः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयोऽनियताः । आकारः ११×३½ । ग्रन्थसंख्या । पत्रसंख्या-१६ । पूर्णा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

आदिवाक्यम्—

श्रीगणेशाय नमः

श्रीश्रीमद्रणजिदिति प्रथाङ्कतो यो भूपालो दिनकरवंशसंभवो वै ।
नत्वा तामिह परदेवतां करोति संतोषायगणितमञ्जरी बुधानाम् ॥

शाको द्विसून्याष्ट ८०२ विहीनितश्चे त्संवत्सरः पुस्तकसंभवः स्यात् ।
कल्पाब्दमेवं नधमेघरामाष्टाष्ट षुबाणाङ्कमही १६५५८८३१६ युतश्चेत् ॥

संवत्सरान्तरकोष्टगतः प्रयुक्तः संवत्सरो ध्रुवगतो द्युगणश्च कल्पात् ।
शेषीकृतो नगमितेस्तपनाच्चवारश्चैत्राद्यवासरसमीपगता निशार्द्धे ॥

गजेन्द्वब्धिशैलाभ्रबृन्दारकै ३३०७४१८ श्च करै २ रामदस्रै २३ र्दर्या-
ब्दिभिश्च ।

अयं षष्टिभक्त श्चतुर्दा विहीनो भवेद्गुण्यभुक्ते गुणो मध्यमार्थम् ॥

मासोऽधिको यत्र च मासघस्रै—
युक्तो विधेयो द्युगणो विधिज्ञैः ।
इष्टेह्नि वारो यदि लभ्यते नौ
सैकोनिरेको द्युगणः स्फुटः स्यात् ॥

अन्तिमंवाक्यम्—

नेपालाब्दे तर्कनागेभयुक्ते माघ्यां पुष्यर्क्षेशनौ प्रीतियोगे ।
पूर्णा चाभूत्पुस्तिका सूक्ष्मकृत्या कार्यानल्पा सूर्यसिद्धान्ततुल्यः ॥

महाराजधिराजेन भूपतीन्द्रस्य सूनुना ।
रणजिन्मल्लदेवेन कृता गणितमञ्जरी ॥

गर्ग मनोरमा

विषयाङ्कः ६७

क्रमाङ्कः ४०२८

ग्रन्थकारः— । मध्यदेशीयं कागतम् । देवनागरी लिपिः
पङ्क्तयः ६ । आकारः ८½×३½ । ग्रन्थसंख्या २० । पत्रसंख्या ३।
पूर्णा । जीर्णा शीर्णा च ।

CC-0. Nepal Sanskrit Academy, Kathmandu

आदिवाक्यम्—

श्रीगणेशाय नमः

नत्वा देवं ढुण्डिराजं महेशं देवेन्द्राद्यैः पूजितं पादयुग्मम् ।
दैवज्ञानां संमते नाल्पसारं कुर्वे नूनं प्रश्न विद्यैक – —॥

वर्गवर्णप्रमाणं च सस्वरं ताडितं मिथः ।
पिण्डसंज्ञा भवेत्तस्य यथा भागैस्तु कल्पना ॥

पुष्पिका—

इति गर्गमनोरमा समाप्ता ।

गर्गमनोरमा टीका

क्रमाङ्कः ४०२८ विषयाङ्कः ६८

ग्रन्थकारः । मध्यदेशीयं कागजम् । देवनागरी लिपिः । पङ्क्तयः ६ । आकारः ८$\frac{3}{2}$×२$\frac{1}{2}$ । ग्रन्थसंख्या । पत्रसंख्या ५ । पूर्णप्राया जीर्णा ।

आदिवाक्यम्—

नत्वा देवमिति । अर्थेत्यनंतरे गर्गसंहिताया मुहूर्तादीन्युक्तानि गर्गाचार्यो मुनिः प्रश्नविद्यां करोति । किं कृत्वा आनन्द रूपं गणेशं नत्वा कस्मैप्रकोजनाय बुद्धिमतां दैवज्ञानां प्रीत्यै एकविंशति श्लोकैः समस्तान्प्रश्नान्करोति ।

अन्तवाक्यम्—

सेवन्ती गुलाब इति च
प्रभाते वादयेत्पुष्पं मध्याह्ने फलनामकम् ।
सायाह्ने देवतानाम रात्रौ नद्यादिकं स्मृतम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

शर्मनोरमाटीका

क्रमाङ्कः ४०३२ विषयाङ्कः ६६

ग्रन्थकारः … । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयोऽनियताः । आकारः ६½×३½ । ग्रन्थसंख्या ३३ । पत्रसंख्या ३ । अपूर्णा ।

गोकुलनाथीयकौतुकम्

क्रमाङ्कः-१२५७ विषयाङ्कः ७०

ग्रन्थकारः – गोकुलनाथः । नेपालीयं कागतम् । देवनागरी लिपिः पङ्क्तयः ६ । आकारः ११×४½ । ग्रन्थसंख्या २७१७ । पत्रसंख्या १२० ।

आदिवाक्यम्—

श्रीगणेशाय नमः

लोकायत्प्रोक्तमार्गेण कार्यं विज्ञाय तत्वतः ।
व्यवहाराः प्रवर्तन्ते तस्मै श्रीभास्वते नमः ॥
ज्योतिरलङ्कार (कुरुः) संख्यावत्प्राणनाथ तनुजन्मा ।
गोकुलनाथ स्तनुते कौतुक मेतन्मुदे विदुषाम् ॥

इह हि सर्वव्यवहारसिद्धये भगवता सूर्येण कृपापरवशतया सिद्धान्तोऽभिहितः । स्वल्पयत्नेन तद्गणितसिद्धये श्रीमकरन्दाचार्यः सारणीं कृतवान् । इदानीं लेखकदोषात्पुस्तकानि भिन्नभिन्नानि दृश्यन्ते सूर्यसिद्धान्ते गणित भेदस्तु न दृश्यते । अतस्तदुपपत्तिज्ञानमन्तरेण पुस्तकशोधानं कथं स्यादित्याशंका लोकानामुपपत्ति ज्ञानाय यत्नोऽयमारभ्यते ।

पुष्पिकावाक्यानि—

शककन्दोपपत्तिः ।
नक्षत्रकन्दोपपत्तिः ।
योगकन्दोपपत्तिः ।
संक्रान्तिनक्षत्रकन्दयोरुपपत्तिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

गुच्छोपपत्तिः ।
इति नक्षत्रगुच्छोपपत्तिः ।
इति तिथिगुच्छोपपत्तिः ।
समाप्तो गुच्छप्रपञ्चः ।
समाप्तः स्फुटीकरणप्रपञ्चः ।
इति गोकुलनाथवर्णिताः पञ्चाङ्गोपपत्तयः ।
इति ग्रहदिनवल्लीसाधनम् ।
इति सूर्यवाटिका ।
इति चन्द्रवाटिका ।
इति चन्द्रकेन्द्रवाटिका ।
इति भौमवाटिका ।
इति बुधकेन्द्रवाटिका ।
इति गुरुवाटिका ।
इति शुक्रकेन्द्रवाटिका ।
इति शनिवाटिका ।
इति केतुवाटिका ।
इति मध्यग्रहोपपत्तयः समाप्ताः ।
इति मन्दफलानयनम् ।
गोकुलनाथ पदानां न्यासैः पूते विचाररम ...
सौराशयानुकूले चरन्तु बृन्दावनकृतिनः ॥
इति शीघ्रफलानयनम् ।
इति गतेर्मन्दफलानयनम् ।
इति गतेः शीघ्रफलानयनम् ।
इति वक्रमार्गांशोपपत्तिः ।
इत्युदयास्तमयकेन्द्रांशोपपत्तिः ।

गौतमजातकम्

क्रमाङ्कः ५८६० | विषयाङ्कः ७१

ग्रन्थकारः— । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयोऽनियताः । आकारः $6\frac{1}{2}\times4\frac{1}{2}$ । ग्रन्थसंख्या २६ । पत्रसंख्या २ । जीर्णा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

आदिवाक्यम् -

श्रीगणेशाय नमः

क्षुब्धप्रकृतिपुरुषाभ्यां यस्मात्तस्मान्महाप्रसूः ।
ततस्तत्वानि जायन्ते यस्मात्तं समुपास्महे ॥
दिव्यदृष्टिवशाच्छास्त्रं कमलयोनिर्वदन्ति हि ।
जन्मनि प्रश्नलग्ने वा मुहूर्ते वा तथैव च ॥

पुष्पिका—

इति गौतमजातकं समाप्तम् ।
संवत् १८८५ ज्येष्ठवदी १४ चन्द्रे लिखितम् ।

गौरीजातकम्

क्रमाङ्कः ५८६४ विषयाङ्कः ७२

ग्रन्थकारः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः १० । आकारः ६×५ । ग्रन्थसंख्या २५५ । पत्रसंख्या १८ ।

आदिवाक्यम्-

श्रीगणेशाय नमः । श्रीदेव्यै नमः ।

कथयिष्यामि ते देवी ग्रहाणां चादियोगिनीम् ।
तासां दशा क्रमेणैव फलं प्रत्येकसंस्थितम् ॥
अन्तर्दशाश्च सर्वासां सर्वदा परिपूजनम् ।
विशेषेण विरुद्धानां पूजनं तन्मनोरपि ॥
सा तु परतरक्षा च कर्त्री त्रिभु-नेऽपि च ।
एतासु च विरूद्धासु न ब्रम्हा न च शंकरः ॥
न विष्णुर्न च लोकेशो ग्रहाश्चापि न रक्षकाः ।

पुष्पिकावाक्यानि—

इति महादशा ।
,, योगिनीतन्त्रे योगिनीदशा समाप्ता ।
,, योगिनीदशा प्रकारस्तथा मन्त्राणि ।
,, योगिनीमहादशा फलानि ।
,, दशान्तर्दशा गणितक्रमः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

ग्रहकौतुकटीका

क्रमाङ्कः २६३१,　　　　　　　　　　　　　　　　विषयाङ्कः ७३

टीकाकारः—केशवदैवज्ञः। मध्यदेशीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः १३। आकारः ९ १/४ × ४। गून्थसंख्या ८३०। पत्रसंख्या ३३।

आदिवाक्यम् —

श्रीमोरेश्वरो जयति

ब्रम्हेशाच्युतविघ्नराजदिनकृन्मुख्यगृहान्केशवो
नत्वा स्वंगृहकौतुकं तु गणिताग्र्यं व्याकरोति स्फुटम्
यस्मादत्रकृतिः परेर्नहि कृता पूर्वा यतो दुर्गमे—
त्यज्ञानां प्रति चेदवगताल्पास्माच्चमत्कारिणी॥

दृष्ट्वैवास्या विजानंति ग्रंथस्यार्थं सुबुद्धयः।
ततो मन्दाववोदार्थं टीकेयं क्रियते मया॥

तत्र निर्विघ्नमन्थपरिसमाप्त्यर्थमभिमतदेवता नमस्कारं तथा ग्रहकरणकरणे कारणमाह।

पुष्पिकावाक्यानि—

इतीष्टदिने मध्यम ग्रहसाधनाधिकारः।
इति पञ्चाङ्गानयनचन्द्रसूर्यानयनाधिकारः।
इति स्पष्टिकरणाधिकारः।
इति उदयास्ताधिकारः।
इति त्रिप्रश्नाधिकारः।
इति चन्द्रग्रहणाधिकारः।
इति सूर्यग्रहणाधिकारः।
इति तिथ्यादिपर्वसंभूतिसाधनाधिकारः।
इति श्रृङ्गोनत्यधिकारः।
इति ग्रहयुत्यधिकारः।

CC-0. Nepal Sanskrit Academy, Kathmandu

इति ग्रहनक्षत्रयोगाधिकारः ।

इति श्रीकेशवदैवज्ञविरचित ग्रहकौतुकस्वोक्तटीकायां पाताधिकारः ।

समाप्तोऽयंग्रन्थः ।

संवत् १७१४ शाके १६७६फाल्गुन शुदि ११ शुक्ले लिखितम् ।

ग्रहकौतुकोपपत्तिः

क्रमाङ्कः २६३० विषयाङ्कः ७४

टीकाकारः – मल्लारिः । मध्यदेशीयं कागतम् । देवनागरी लिपिः ।
पङ्क्तयोऽनियताः । आकारः ६ × ४ । ग्रन्थसंख्या १२६६ । पत्रसंख्या ४६

आदिवाक्यम्

श्रीगणेशाय नमः

धृतिसुरपति हीन इति । अत्र उपपत्तिः । अत्राष्टादशाधिक चतुर्दश शतमिते शके ग्रन्थारम्भतोऽग्रिमशकपर्यन्तवर्षज्ञानार्थमनेनेष्ट शक उनी कृत; सगतवर्षगणो जातः । तस्मान्मध्यम ग्रहाः साध्यन्ते । तदिष्टशकपर्यन्ताः स्युः ।

पुष्पिकावाक्यानि –

इति मध्यमाधिकारः ।

इति पञ्चाङ्गार्केन्दुस्पष्टिकरणाधिकारः ।

इति स्पष्टीकरणाधिकारः

इत्युदयास्ताधिकारः

इति त्रिप्रश्नाधिकारः

इतिपर्वज्ञानार्थं तिथ्यर्क सपातसाधनाधिकारः ।

इति चन्द्रग्रहणम् ।

इत्यर्कग्रहणम् ।

इत्यग्रिमवर्ष तिथ्यादिसाधनाधिकारः ।

इति शृङ्गोन्नत्यधिकारः ।

इति ग्रहयुत्यधिकारः ।

इति नक्षत्रछायाधिकारः ।

इति पाताधिकारः ।

इति श्रीगणक कुलतिलक श्रीदिवाकर सांवत्सराचार्यसुत श्रीमल्लारी दैवज्ञ रचितो ग्रहकौतुकोपपत्तिः समाप्तः । संवत् १६८४ शुभम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

ग्रहगणितम्

क्रमाङ्कः २६१४ विषयाङ्कः ७५

ग्रन्थकारः — — — । मध्यदेशीयं कागतम् । देवनागरी-लिपिः । पङ्क्तयः । आकारः ११ × ४$\frac{३}{५}$ । ग्रन्थसंख्या ··· । पत्रसंख्या ६४ । आदिमध्यखण्डितम् । जीर्णम् ।

ग्रहगणित सारणी वा

क्रमाङ्कः २६३५ विषयाङ्कः ७६

ग्रन्थकारः — — — । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः । आकारः ६$\frac{१}{४}$ × ४ । ग्रन्थसंख्या । पत्रसंख्या ४२ । अपूर्णम् ।

ग्रहगणितं सारणी वा

क्रमाङ्कः २६४८ विषयाङ्कः ७७

ग्रन्थकारः ··· ···· । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः । आकारः १५$\frac{3}{3}$ × २$\frac{१}{५}$ । ग्रन्थ-संख्या १०५ । पत्रसंख्या ६ । अपूर्णम् ।

ग्रहगणितं नेपालीभाषा

क्रमाङ्कः २७६३ विषयाङ्कः ७८

ग्रन्थकारः — — । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः १५ । आकारः ८$\frac{४}{१}$ × ५ । ग्रन्थसंख्या ६५० । पत्रसंख्या २६ । अपूर्णा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

ग्रहगणितसारणी

क्रमाङ्कः ६३२ विषयाङ्कः ७६

ग्रन्थकारः .. । नेपालीयं कागतम् । देवनागरी लिपिः ।
पङ्क्तयः । आकारः १४$\frac{1}{2}$×५ । ग्रन्थसंख्या । पत्रसंख्या ३२

ग्रहगोचरफलम्

क्रमाङ्कः ७४२२ विषयाङ्कः ८०

ग्रन्थकारः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयोऽनियताः । आकारः ८$\frac{1}{2}$ × ४$\frac{1}{2}$ । ग्रन्थसंख्या २१६ । पत्रसंख्या ७

आदिवाक्यम्ः -

अथ गोचराद्ग्रहाणंफलं यद्यपि साधारणयेन सर्वेप्येकादशे
श्रेष्ठाः शनेर्वेदा स्त्रिषष्ठगाः ।
आसुताष्टनवान्त्येषु भृगुज्ञोऽन्त्यं विना समे ।
द्विगो पञ्चसु शक्लेन्दुः सदेज्यश्च नगे च तौ ।
तारान्याप्यगपञ्चेभ्यः खेऽर्कः साघ शशी शुभः ।
इति त्रिविक्रमेण शुभस्थानानि ग्रहाणामुक्तानि ।

अन्तिमंवाक्यम्

तन्मूलवाक्यं शिवशिद्धान्ते—
अर्कोनेन्दुग्रहास्त्रिशतिथयः प्रतिपदादिका ।
सार्केन्दु ग्रहतो भानि योगा विष्कम्भकादय इति ॥

अतः परं खण्डितम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

ग्रहगोचरी

क्रमाङ्कः ७४०४ विषयाङ्कः ८१

ग्रन्थकारः --आर्यग्रहः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ७ । आकारः $१०\frac{1}{2} \times ३\frac{1}{2}$ ग्रन्थसंख्या २०० । पत्रसंख्या । आदिखण्डितम् ।

ग्रहणतत्वम्

क्रमाङ्कः २६४२ विषयाङ्कः ८२

ग्रन्थकारः- सत्यधरात्मजश्चक्रपाणिः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयोऽनियताः । आकारः $८ \times ३\frac{1}{2}$ । ग्रन्थ-संख्या ४० । पत्रसंख्या ३ । जीर्णं शीर्णं च ।

आदिवाक्यम्—

श्री लम्बोदरं नौमि
निधाय गुरुपादुके शिरसि चक्रपाणिर्मुदा
करोति रविचन्द्रयोर्ग्रहणमर्कनक्षत्रतः ।
गतमिति हतं गतर्क्षयुतमब्धिभयादहत
स्फुट इनस्ततोमिति हता खखेभागतिः ।

पुष्पिकावाक्यानि—

इति चन्द्रग्रहणम्
इति सूर्यग्रहणम् ।
इति श्रीसत्यधर पण्डितात्मज श्रीचक्रपाणिविरचितग्रहणतत्वं परिपूर्णम् ।
१७१७ माघशुक्ल १ लिखितम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

ग्रहणभङ्गी विभङ्गीकरणम्

क्रमाङ्कः २६३४ विषयाङ्कः ८३

ग्रन्थकारः— रङ्गनाथः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः६ । आकारः ६×४ । ग्रन्थसंख्या ५३१ । पत्रसंख्या २८

अन्तवाक्यम् —

— — - ङ्गंच तस्मिन् परिधिगतलवा ये नीचतुङ्ग भिधेंशा मुनिवर गदितास्ते कक्षिकास्यांशमानात् ।
नीचोच्चतुल्ये खचरे ऽपि पूर्वं निचोच्चवृत्तस्य लघा प्रदिष्टाः ।
ओजांत भागैर्विवरे ऽ नुपातात्तद्वे दिमनाहं फलशून्यतायाः ॥

अन्तिमंवाक्यम्—

गिरं गुरूणां हृदिसन्निधाय श्रीमन्नृसिंहात्मजरङ्गनाथः ।
मुनीश्वरस्याननभञ्जनार्थं भङ्गीविभङ्गी करणं चकार ।
इति श्रीसकलगणकसार्वभौम श्रीमन्नृसिंह दैवज्ञस्यसुतेन रङ्गनाथेन कृतं मुनीश्वरकृतग्रहभङ्गीविभङ्गीकरणं मुनीश्वरमुखभञ्जनं समाप्तिमगमत् ।

संवत् १७०८ समये भाद्रपदवदी अमावास्यायां लिखितमिदं गोविन्देन ॥

ग्रहणसंबन्धिलेख नेवारभाषा

विषयाङ्कः ८४

क्रमाङ्कः २६४७

ग्रन्थकारः— दैवज्ञः विष्णुसिंहः । नेपालीयं कागगम् । नेवारी लिपिः । पङ्क्तयोऽनियताः । आकारः ६ × ३ । ग्रन्थसंख्या २१७६ । पत्रसंख्या १६१ ।

आदिवाक्यम् —

ॐनमःश्रीचन्द्राय

शतभाग१००या ॥ समलिसा दयके॥ समलिसा चन्द्रस समलिसा राहु-नयोया शेषया पातोन चन्द्रधाय मेषादि उत्तरदिग तुलादि दक्षिणदिग ।

CC-0. Nepal Sanskrit Academy, Kathmandu

पुष्पिका वाक्यानि -

इति सूर्य्यसिद्धान्ते चन्द्रग्रासः ।
इति चन्द्रग्रासः समाप्तः ।
इति दैवज्ञ विष्णुसिंह विरचित खण्डखाद्यमते सूर्यग्रासाधिकारः
इति श्रीकरणे सूर्यग्रास टीका ।
इति चन्द्रग्रासाधिकारः ।
इति श्रीसूर्य्यसिद्धान्ते चन्द्रग्रासाधिकारः ।
इति दैवज्ञ विष्णुसिंह विरचिते नक्षत्रमत सूर्यग्रासाधिकारः ।
इति नक्षत्रमते चन्द्रग्रासः ।
इति चन्द्रग्रासः ।
इति लघुसिद्धान्तमते सूर्यग्रासाधिकारः ।
इति दैवज्ञ विष्णुसिंह विरचिते स्वल्पमते चन्द्रग्रासाधिकारः ।
" " सूक्ष्मसिद्धान्ते सूर्यग्रासाधिकारः ।
" " चन्द्रग्रासाधिकारः ।
इति सूक्ष्मसिद्धान्तमते चन्द्रग्रासाधिकारः ।
इति दैवज्ञ विष्णुसिंह विरचिते सिद्धान्त रहस्ये सूर्य्यग्रासाधिकारः ।

ग्रहणसम्बन्धिलेख नेवारभाषा

क्रमाङ्कः २६४७ विषयाङ्कः ८५

ग्रन्थकारः .. .. । नेपालीयं कागतम् । नेवारी लिपिः ।
पङ्क्तयोऽनियताः । आकारः १२ × ४ । ग्रन्थसंख्या ३५० ।
पत्रसंख्या ५० ।

आदिवाक्यम्—

ॐनमःश्रीसूर्य्याय

सूर्य्यग्रासज्यांये परिपाटि थथ्यंजुरो ॥ सूर्य्यस्फुट चन्द्रस्फुट । राहुस्फुट सूर्य्यभुक्ति चन्द्रभुक्ति राहुभुक्ति थ्वतेचोस्यंते ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अन्तिमवाक्यम्

विक्षेप उत्तरदिगजुरसा दक्षिणग्रास आग्नय स्पर्श नैऋत्य मोक्ष सर्वग्रास जुरसा वायव्यनि मीलन इशान उन्मीलन ॥ इति खण्डखाद्यमते चन्द्रग्रासटीका समाप्त।

समयः— सं० ७६० कार्तिकवदि १२ बुधवार थुकुन्हु चोया।

ग्रहणमाला

विषयाङ्कः ८६

क्रमाङ्कः २६३२

ग्रन्थकारः ... । नेपालीयं कागतम्। देवनागरी लिपिः। पङ्क्तयोऽनियताः। आकारः १४×५½। ग्रन्थसंख्या ... । पत्रसंख्या ८। शाके १७६२ तः १८६५ पर्यन्तानाम्।

ग्रहदशाफलम्

विषयाङ्कः ८७

क्रमाङ्कः ७४३२

ग्रन्थकारः ... । मध्यदेशीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः ११। आकारः ८×४½। ग्रन्थसंख्या । पत्रसंख्या १।

आदिवाक्यम्—

अथ ग्रहदशाफलम्

सूर्ये स्वस्यदशां गतो धनहरो रोगप्रदो चन्द्रमाः
शत्रुर्व्याधिहरः कुजो जयकरो राहुः शरीरार्तिकृत्।
जीवो धर्मधनप्रदो रविसुतो बन्धवादिदुःखप्रदो
ज्ञः कुष्ट्यादिकरः शिखी शुभकरः शुक्रोऽयंशान्तिप्रदः॥

पुष्पिकावाक्यम्—

इति ग्रहदशाफलम्।

CC-0. Nepal Sanskrit Academy, Kathmandu

ग्रहदीपिका

क्रमाङ्कः ७०६७ विषयाङ्कः ८८

ग्रन्थकारः- गौरीश्वरः। मध्यदेशीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः ७। आकारः १०×४। ग्रन्थसंख्या २४०। पत्रसंख्या १६। पूर्णा।

आदिवाक्यम्—

ॐ स्वस्ति। श्रीगणेशायनमः॥ श्रीमालिकायैनमः॥
नत्वा ग्रहेन्द्रं शिरसा गणेशं गौरीश्वरेण क्रियते स्फुटार्था।
पञ्चाङ्गपत्रं ग्रहणोदयादे द्रीक्सिद्धिहेतोर्ग्रहदीपिकेयम्॥
यतः लादन्द कृतार्कतन्त्रप्रमापितेनांतरतां गता सा।
अत स्तदुक्तैर्गुणभाजकाद्यैस्तामुद्यतः स्पष्टतरां प्रकर्तुम्॥

पुष्पिकावाक्यानि—

इति श्रीज्योतिर्विद्गौरीश्वरविरचितायां ग्रहदीपिकायां रवीन्दुकेन्द्र ध्रुवानयनाधिकारः प्रथमः।

„ भौमादिध्रुवानयनाधिकारो द्वितीयः।
„ रवीन्दुस्फुटपञ्चाङ्गसाधनाधिकारस्तृतीयः।
„ भौमादिस्फुटानयनाधिकारश्चतुर्थः।
„ चन्द्रग्रहणाधिकारः पञ्चमः।
„ चन्द्रग्रहणाधिकारः षष्ठः।
„ सूर्यग्रहणाधिकारः सप्तमः।
„ परिलेखाधिकारः अष्टमः।

श्रीशाके १७०७ मासे ५ शुक्ले ६ वासरे ६ श्रीघनश्यामेन लिखितम्।

ग्रहदीपिका

क्रमाङ्कः २६७६ विषयाङ्कः ८६

ग्रन्थकारः— दयाशङ्करः मध्यदेशीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः ८। आकारः ७×४½। ग्रन्थसंख्या ११५। पत्रसंख्या ११

CC-0. Nepal Sanskrit Academy, Kathmandu

आदिवाक्यम् -

श्रीगणेशायनमः

नमस्कृत्य गणेशानं प्रत्यूहव्यूहहारिणम् ।
दयाशङ्करनामाहं द्योतये गृहदीपिकाम् ॥
विघ्न विघाताय नमेत्यनुष्टुभा मङ्गलाचरणेन पूर्वं गणेशं नमस्कृत्य ततः
कर्णिकायां द्वादशाङ्गवृत्तसूर्यमण्डलनिष्पादनप्रकारमिन्द्रवज्रयाह ।

पुष्पिकावाक्यम्-

इति श्रीधरजिधरसूनुना दयाशङ्करेण कृता गृहदीपिका समाप्ता॥श्रीरस्तु

ग्रहनामावली

क्रमाङ्कः ६१२०

विषयाङ्कः ८०

ग्रन्थकारः — — — । मध्यदेशीयं कागतम् देवनागरी लिपिः । पङ्क्तयोऽनियताः । आकारः १०×४ । ग्रन्थसंख्या । पत्रसंख्या ३ । पूर्णा ।

आदिवाक्यम्--

श्रीगणेशायनमः

श्रीमद्गुरुं पशुपतिं भारतिं भास्करं हरिम् ।
प्रणम्य भगणादीनां नामानि कथयाम्यहम् ॥
अश्विनी तुरगो वाजी तुरंगश्च तुरङ्गमः ।
घोटकोऽश्वो हयो वाहो भिषग्वैद्यश्चिकित्सकः ॥
यमोऽन्तकः कृतान्तश्चयाम्यः प्रेतपतिस्तथा ।
भरणी युग्मभं लालाकालो दण्डधरोऽसितः ॥

अन्तिमवाक्यत् -

राहुःपुच्छश्चेति सूर्यादुग्रहाणां संज्ञका इमे ।
व्योमगाः खचराः खेटा ग्रहाश्चाकाशसंस्थिताः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

अन्तरिक्षचराः सूर्यान्नामान्युक्तानि सूरिभिः ।
इति ग्रहाणां नामानि ॥

श्रीशाके १७१६ चैत्र कृष्णैकादश्यां कुजे नेपालदेशे लिखितं श्रीउमानाथ द्विजेन ॥ शुभम् ॥

ग्रहलाघवम्

क्रमाङ्कः२८७२ विषयाङ्कः ६०

ग्रन्थकारः— गणेशदैवज्ञः । नेपालीयंकागतम् । देवनागरीलिपिः । पङ्क्तयः ७ । आकारः १० × ४½ । ग्रन्थसंख्या ३६४ । पत्रसंख्या २७ । पञ्चांगाधिकारपर्यन्तम् ।

आदिवाक्यम्—

श्रीगणेशायनमः । श्रीगुरुभ्योनमः ।

ज्योतिः प्रबोधजननी परिशोध्यचित्तं
तत्सूक्तकर्मचरणैर्गहनार्थपूर्णा ।
स्वल्पाक्षरापि च तदंशकपैरुपाये —
र्व्यक्तीकृता जयति केशववाक् श्रुतिश्च ॥
परिभग्नखमौर्विकेशचापं दृढगुणहारलसत्सुवृत्तवाहुम् ।
सुफलप्रदमात्तनृप्रभं तत्स्मर रामं करणं च विष्णुरूपम् ॥

पुष्पिकावाक्यानि

इति श्रीकेशवदैवज्ञसुतगणेशदैवज्ञविरचिते सिद्धान्तरहस्ये मध्यमाधिकारः ।

" चन्द्रसूर्यस्पष्टाधिकारः ।

" भौमादीनां स्फुटाधिकारः ।

" लग्नादिछायायंत्रभागदिक्साधननलिकाबंधाधिकारः समाप्तः ।

" चन्द्रग्रहणाधिकारः ।

" सूर्यग्रहणाधिकारः ।

" पर्वानयनम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

" तिथिपत्रादेव ग्रहणद्वयसाधनाधिकारः ।
" चन्द्रदर्शनाधिकारः ।
" उदयास्ताधिकारः ।
" छायाधिकारः ।
" नक्षत्रछायाधिकारः ।
" शृङ्गोनत्यधिकारः ।
" ग्रहयुत्यधिकारः ।
" पाताधिकारः ।
" पञ्चाङ्गाधिकारः ।
" शुभमस्तु ॥

ग्रहलाघवम्

क्रमाङ्कः २८६६ विषयाङ्कः ६२

ग्रन्थकारः—गणेशदैवज्ञः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ६ । आकारः १०$\frac{1}{3}$ × ४$\frac{3}{8}$ । ग्रन्थसंख्या ३६७$\frac{?}{?}$ । पत्रसंख्या २० । हीनशकाहर्गणोत्पन्नाधिकारपर्यन्तम् ।

ग्रहलाघवम्

क्रमाङ्कः २८७३ विषयाङ्कः ६३

ग्रन्थकारः गणेशदैवज्ञः । मध्यदेशीयं कागतम् । देवनागरीलिपिः । पङ्क्तयोऽनियता । आकारः १० × ४$\frac{1}{2}$ । ग्रन्थसंख्या ३६७ । पत्रसंख्या २४ । जीर्णा ।
संवत् १८६६ शाके १७३४ पौषमासे कृष्णपक्षे मंदवासरे बिरेश्वरेण लिखितम् ।

ग्रहलाघवम्

क्रमाङ्कः २८६८ विषयाङ्कः ६४

ग्रन्थकारः— गणेशदैवज्ञः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयोऽनियताः । आकारः ७$\frac{1}{2}$×५ । ग्रन्थसंख्या ३१४ । पत्रसंख्या ४५ ।

CC-0. Nepal Sanskrit Academy, Kathmandu

शाके १७१८ नलनामाब्दे भाद्रपद्रपदवद्दुले रविवासरे समाप्तम् ।

ग्रहलाघवम्

क्रमाङ्कः ७०६६ विषयाङ्कः ६५

ग्रन्थकारः— गणेशदैवज्ञः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः । आकारः ६×३$\frac{1}{2}$ । ग्रन्थसंख्या । पत्रसंख्या १२ ।

ग्रहलाघवम्

क्रमाङ्कः २८७१ विषयाङ्कः ६६

ग्रन्थकारः— गणेशदैवज्ञः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ११ । आकार ६$\frac{1}{2}$ ४$\frac{1}{2}$ । ग्रन्थसंख्या २४० । पत्रसंख्या १४ ।

ग्रहलाघवं सोदाहरणम्

क्रमाङ्कः २८६७ विषयाङ्कः ६७

टीकाकारः- विश्वनाथदैज्ञः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ६ । आकारः ११×४$\frac{1}{2}$ । ग्रन्थसंख्या १६५० । पत्रसंख्या १०७ ।

आ दिवाक्यम्—

श्रीगणेशायनमः

ज्योतिर्विद्गुरुणागणेशगुरुणानिर्मथ्य शास्त्राम्बुधिं
यच्चक्रे ग्रहलाघवं विवरणं कुर्वेऽस्य सत्प्रीतये
स्मृत्वा शम्भुसुतं दिवाकरसुतस्तद्विश्वनाथः कृती
जाग्रज्ज्यौतिषवर्य गोकुल परित्राणाय नारायणः ॥

श्रीमद्गुरुणा गणेशदैवज्ञेन ये ग्रन्थाः कृतास्ते तद्भ्रातृपुत्रेण नृसिंहज्यौतिर्विदा स्वकृतग्रहलाघवटीकायां श्लोकद्वयेन निबद्धाः । तद्यथा—

CC-0. Nepal Sanskrit Academy, Kathmandu

कृत्वादौ ग्रहलाघवं लघुबृहत्तिथ्यादिचिन्तामणि
सत्सिद्धान्तशिरोमणेश्च विवृत्तिं लीलावती व्याकृतिम् ।
श्रीवृन्दावन टीकिकां च विवृतिं मौहूर्ततत्वस्य वै
सच्छास्त्रादिविनिर्णयं सुविवृतिं छन्दोऽर्णवाख्यस्य वै ॥

सुधीरञ्जनं तर्जनीयन्त्रकं च
सुकृताष्टमीनिर्णयं होलिकायाः ।
लघूपाय यात स्तथान्यानपूर्वान्
गणेशो गुरुर्ब्रह्मनिर्वाणमागात् ॥

श्रीमत्कौशिकमुनिश्रेष्ठवंशोद्भवो जलधीतीरनीकटवर्ति नंदिग्राममनिवासी सकलभूमण्डलपतिपूजितचरणयुगलांभोरुहो-निखिलशास्त्रार्थप्रवीणोदर्शसिद्धान्तोपपत्तिकोविदः समस्तवैयाकरणाग्रणीरगणितशास्त्रविचारसारचतुरो ज्योतिर्वित्कुलावतंसः श्रीमत्केशवदैवज्ञात्मजगणेशदैवज्ञवर्यो ग्रहलाघवाख्यकरणं चिकीर्षु स्तत्रादौ निर्विघ्नग्रन्थसमाप्त्यर्थं च आशीर्नमस्क्रियावस्तुनिर्देशात्मकानांमङ्गलानामिष्टदेवतागुरुवाग्निर्देशात्मकंमङ्गलं वसंत तिलकया प्रतिबध्नाति ॥ ज्योतिः प्रशोध जननीत्यादिना ।

सा केशवस्य ग्रन्थकृतस्य वाक् वाणिर्जयति सर्वोत्कर्षेण-वर्तते । सा श्रुतिर्वेदोऽपि जयति । कीदृशीति श्लेषेणाह । ज्योतिषवोधजननी ज्योतिषां ग्रहनक्षत्रादीनां प्रवोधं ज्ञानं जनयतीति सा। अन्यत्र ज्योतिरहेतेजसः परब्रह्माख्यस्य प्रवोधो ज्ञानं तज्जनयतीति सा । किं कृत्वा चित्तं परिशोध्य चित्तं मनः संशोध्य निश्चलीकृत्य । अन्यत्र चित्तं परिशोध्य मनो निर्मलीकृत्य ।कैः तत्सूक्तकर्माचरणैः । तेन केशवेन सुष्टूक्तानिकर्माणि । ग्रहकरणानि तेषां चरणानि सद्भ्यासस्तैः । तदुक्त ग्रहकरणानि गृहकौतुकादीनि सदस्य मनो निश्चलीकृत्य ग्रहादीनां प्रवोधो भवतीत्यर्थः। अन्यत्र तस्यां श्रुतौ सुष्टूक्तानि यानि विष्णु सूक्तादीति तानि कर्माणि धर्मकर्मानुष्ठानादीनि तेषां चरणान्याचरणानितैः । तदनुष्ठानैश्चित्तं निर्मलीकृत्य परब्रह्मज्ञानं भवतीत्यर्थः। पुनः किंलक्षण। गहनार्थ पूर्णा स्वल्पानि अक्षराणि यस्यां सा परिमिताक्षराणि । ननु स्वल्पा क्षरायाः कस्याप्यर्थबोधो नस्यादित्यप्याह। तद्वंशकृतैरुपायैर्व्यक्तीकृता । तस्यांशास्तत्पुत्रादयस्तच्छिष्यश्च तैः

CC-0. Nepal Sanskrit Academy, Kathmandu

कृतैरुपायैर्टीकाभिर्व्यक्तीकृता । अन्यत्र तदंशाः श्रुतेरावणादयस्तैः कृतैरुपायैर्भाष्यादिभिर्व्यक्तिकृता प्रकटीता ।

श्रीसंवत् १९१५ शाके १७७९ शुक्लनाम संवत्सरे मासानांमासोत्तमे मासे आषाढमासे कृष्णपक्षे द्वादश्यांतिथौ गुरुवासरे ग्रहलाघवं समाप्तम् ॥

ग्रहलाघव उदाहरणम्

क्रमाङ्कः २८७४ विषयाङ्कः ९८

टीकाकारः— विश्वनाथदैज्ञः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः १० । आकारः ९ $\frac{2}{3}$ × ५ $\frac{1}{2}$ । ग्रन्थसंख्या ९२५ पत्रसंख्या ४८ । सूर्यग्रहणोदाहरणपर्यन्तम् ।

संवत् १९०८ मिति श्रावणकृष्णपक्षे ७ ।

ग्रहलाघव उदाहरणम्

क्रमाङ्कः २८७५ विषयाङ्कः ९९

टीकाकारः- विश्वनाथदैवज्ञः । मध्यदेशीयं कागतम् । देवनागरी लिपिः पङ्क्तयः १० । आकारः १०×४ $\frac{1}{2}$ । ग्रन्थसंख्या २५० । पत्रसंख्या १३ अन्त्यखण्डितम् ।

ग्रहलाघव उदाहरणम्

क्रमाङ्कः २८७६ विषयाङ्कः १००

टीकाकार- विश्वनाथदैवज्ञः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ९ । आकार ९ $\frac{2}{3}$ × ४ $\frac{2}{3}$ । ग्रन्थसंख्या १९५० । पत्रसंख्या ९२ । पूर्णम्

संवत् १८३६ शाके १७३१ । आषाढकृष्ण १२ शनौ लिखितम गुमानीरामेण काश्याम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

ग्रहलाघव उदाहरणम्

विषयाङ्कः १०१

क्रमाङ्कः २८७७

टीकाकारः– विश्वनाथदैवज्ञः। मध्यदेशीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः ८। आकारः १०×४ $\frac{१}{२}$। ग्रन्थसंख्या ··· । पत्रसंख्या ६५। अन्त्यखण्डितम्।

ग्रहलाघव उदाहरणम्

विषयाङ्कः १०२

क्रमाङ्कः २८७८

टीकाकारः– विश्वनाथदैवज्ञः। मध्यदेशीयं कागतम्। देवनारी लिपिः। पङ्क्तयोऽनियताः। आकारः १६×५ $\frac{१}{२}$। ग्रन्थसंख्या ३३६ पत्रसंख्या २६। आदिरहितम्।

संवत् १८३० शाके १६६५ दक्षिणायने।

ग्रहलाघव उदाहरणम्

विषयाङ्कः १०३

क्रमाङ्कः २८८०

टीकाकारः– विश्वनाथदैवज्ञः। मध्यदेशीयं कागतम। देवनागरी लिपिः। पङ्क्तयः ११। आकारः ११×४। ग्रन्थसंख्या १६५० । पत्रसंख्या ५४ पूर्णम्।

ग्रहलाघव उदाहरणम्

विषयाङ्कः १०४

क्रमाङ्कः २८८१

टीकाकारः-- विश्वनाथदैवज्ञः। मध्यदेशीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः १०।११। आकारः ६ $\frac{१}{२}$×४ । ग्रन्थसंख्या १२० पत्रसंख्या ११। हीनशकाहर्गणोत्पन्नाधिकारपर्यन्तम्।

CC-0. Nepal Sanskrit Academy, Kathmandu

ग्रहलाघव टीका

क्रमाङ्कः २८८३ विषयाङ्कः १०५

